यद्यनु विश्रामस्तस्यानित्यत्वे समवेतकार्योत्पत्तिप्रसंगः स्यादतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्व मिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यं त्रस रेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालव दित्यनुमानेन तदवयवानामवयवसिद्धिः न चेदमप्रयोजकमपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् न चैवं क्रमेण तदवयवधाराप्रसिद्धेरिति वाच्यं अवैव स्याश्रयेन तदसिद्धेरिति ॥ ॥ ॥

न चैवं त्रसरेणुपुंज एवास्त्ववयवीति वाच्यं विशकलितेषु पिंडितेषु घट इत्यादिप्रत्ययसंप्रयोगात् न च तत्संयोग एव घटस्तेन घ टो द्रव्यमित्यादिप्रतीतौ च पर्यवस्यातद्गुणमिति वाच्यं संभवति सामान्यसंबंधविषयत्वे परंपरासंबंधविषयत्वकल्पने गौरवादिति ननु परमाणुत्रयेण कुतो न द्व्यणुकारंभः परमाणुद्वयेन द्व्यणुकवत् एवं द्व्यणुकद्वयेन त्र्यणुकारम्भः स्यादिति त्रिभिर्द्व्यणुकैः त्र्यणुकवदिति चेन्न प्रमाणाभावेन तादृशद्रव्यासिद्धेः परमाणुद्वये द्व्यणुकद्वये च द्रव्यारंभकसंयोगाकल्पनात् अत एवेदं चिंत्यम् । त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु परमाणुभ्यामनारंभस्तु सिद्धांतिनो द्व्यणुकाभ्यामनारंभ इव मानाभावात् [illegible] तथा णामेव पुंजपदद्रव्यारंभकसंयोगकल्पनात् वस्तुतो गवाक्षं [illegible] द्व्यणुकत्वमेव युक्तं अणुद्वारत्वे [illegible] दिति ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का० मु० टी० ३१

रूपादिमध्य इति रसगंधस्पर्शाः आदिपदार्थाः नवशरावगंधव्यंजकजलेऽमनसि च व्यभिचारवारणायैवकारः तज्जलेन सक्तुरसस्याप्यभिव्यंजकत्वान्नदोषः घ्राणेन्द्रियेण गंधाभिव्यंजकत्वाद्धेतावप्रसिद्धिवारणाय हेतौ मनसोऽन्यत्वासिद्धिवारकविशेषणं निरर्थकं इति वाच्यं व्यभिचारस्थानत्वे हेत्वप्रसिद्धावपि व्याप्तिज्ञानाभावेनानुमितिप्रतिबंधकत्वात् व्याप्तिग्रहोपयिकाप्रसिद्धिवारकविशेषणोपादानस्य सार्थक्यात् तदर्थत्वात् हेतुवाक्यघटकमध्यान्तपदसमभिव्याहारस्यैव कार्यार्थत्वात् तथा च दृष्टान्ते स्वीयरूपादिव्यंजकत्वादावसिद्धिवारणाय परकीयत्वं रूपादौ विशेषणं देयमिति भावः तस्येति नवशरावगंधव्यंजकजलस्येत्यर्थः न च येन नवशरावगंधो व्यंजकजलेन न सक्तुरसोऽनाभिव्यंजितस्तज्जलविशेषेऽनैकान्तिक इति वाच्यं परकीयरूपादिविषयकसाक्षात्कारस्वरूपायोग्य

गोर

इन्द्रियमिति घ्राणेन्द्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथमिति चेत् इत्थं घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गंधस्यैव व्यंजकत्वात् कुंकुमगंधाभिव्यंजकघृतादिवत् न च दृष्टान्ते स्वीयरूपादिव्यंजकत्वादसिद्धिरिति वाच्यं परकी

इन्द्रियं घ्राणलक्षणं

यरूपाद्यव्यंजकत्वस्य तदर्थत्वात् न च नवशरावगंधव्यंजकजलेऽनैकान्तिक इति वाच्यं तस्य सक्तुरसाभिव्यंजकत्वात् यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्पर्शेन तत्संभवात् न च घ्राणेन्द्रियसन्निकर्षस्य गंधमात्रव्यंज

कत्वस्य विवक्षितत्वात् नवशरावगंधव्यंजकजले पि रसव्यंजकतावच्छेदकजलत्वस्य सत्त्वादिति परकीयेति विशेषणप्रवेशे लाघवादाह यद्वेति तद्दाने हेतुमाह वायूपनीतेति इदमत्र बोध्यं रूपाद्यव्यंजकत्वे सति इत्यस्य हेतुत्वे येन सर्वथा व्यंजकत्वे सति गंधव्यंजकत्वस्य नवशरावगंधव्यंजकोदके व्यभिचारेण तद्वारणाय कर्तव्यत्वात् स्पर्शाभावात् तत्र हेतुषु रूपरसस्पर्शानां परकीयत्वं विशेषणं न च प्रथमहेतौ [illegible] नवशराव गंधव्यंजकजले व्यभिचारः लुप्तान्तरमसीनीलरूपव्यंजकत्वात् न च तत्र यहेतौ तत्र व्यभिचारः एतद्दूषणवारणायापि यद्वेति का[...]त्यान्तरप्रणयनात् तत्रापि परकीयत्वविशेषणाघटितहेतुत्व पमिति तत्र घ्राणेन्द्रियसन्निकर्षे इन्द्रियत्वं न जातिस्तेजस्त्वादिना

रा० ३१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शंकते तत्रैवेति भग्नहस्ते तेति भग्नहस्तयोर्विभागविशेषविशिष्टावयवयोः संरोहणादिकं आदिना वृद्धिसंग्रहः वृद्धिश्चावयवोपचयः॥ तदुत्पादनादिति आध्यात्मिकवायुसंयोगानुमितेः न च भग्नहस्तसंरोहणादिहेतुभूतवायोः प्राणे प्रमाणाभावः इति चेन्न नर्मदाती रसंजाताः सरलार्जुनपादपाः नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिं॥ गुरूं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः श्मशाने जायते वृक्षः कंकगृध्रोपसेवित इत्यागमस्यैव तत्र मानत्वात् अन्त्यावयवित्वेनेति द्रव्यानारंभकद्रव्यत्वेनेत्यर्थः अत शरीरे चेष्टाश्रयाभावेनाप्ते राह अथवेति घटत्वमादाय घटेऽतिव्याप्तिवारणाय चेष्टावदिति हस्तादावतिव्याप्तिवारणायान्त्यावयवीति न च हस्तत्वादिकं न जा

तत्रैव किं मानमिति चेत् भग्नहस्तसंरोहणादिना तदुत्पादनात् यदि हस्तादौ शरीरव्यवहारो न भवति तदान्त्यावयवि त्वेन विशेषणीयं न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यं तादृशशरीरे मानाभावात् अथवा चेष्टाव द्वृत्त्यवयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं तत् अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं मनुष्यत्वं चैत्रत्वादिजा वा ३
तिमादाय लक्षणसमन्वयः न च नृसिंहशरीरे कथमेतल्लक्षणसमन्वयः तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जा तित्वाभावात् जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावात् इति वाच्यं कल्पभेदेन नृसिंहशरीर स्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्॥ ॥श्री॥ ॥

तिः पृथिवीत्वादिना संकरादिति वाच्यं पृथिवीत्वादिव्याप्यनानाजात्यङ्गीकारात् पृथिवीत्वव्याप्यनानाजातिमत्ति घटादाव तिव्याप्तेर्लक्षणान्तरमाह अन्त्यावयवीति अन्त्यावयविमात्रवृत्तीत्यनेन द्रव्यत्वजातिव्युदासः चेष्टावद्वृत्तीत्यनेन घटत्वादि व्युदासः चेष्टा च हिताहितप्राप्तिपरिहारान्यतरक्रियाजन्यस्पन्दनमात्रं न घटादावपि सत्त्वात् ननु देवत्वजातिमादाय ल क्षणसमन्वय इत्यत आह जलीयेति देवत्वस्यापीति अपिना नृसिंहत्वपरिग्रहः जातित्वाभावादिति जातिसांकर्यादिति भा वः जातिसांकर्यस्य दोषत्वे देवत्वशरीरत्वादेर्नानाजातित्वाङ्गीकाराद्वा देवत्वशरीरत्वजातिमादायैव लक्षणसमन्वय इति ध्येयम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नानिरूपककार्यतानिरूपितकारणतावच्छेदकतया सिद्धजलत्वप्रत्यक्षसिद्धजलत्वं जातिरेव बाधकाभावात्
कार्यबाधकं नास्ति शङ्कते चेन्न कार्यतावच्छेदकतावच्छेदकं स्यात् तत्समवायित्वसंबन्धेन इत्यभिप्रायेणाह नित्य

इति पृष्ठसंख्या १२

का० मुक्ता० १२

जलत्वजातौ प्रमाणमाह स्नेहेति कारणतावच्छेदकतया धर्मसिद्धौ बाधकाभावात्तस्य जातित्वमिति भावः नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वं न संभवति इति शंकते यद्यपीति तथा कार्यतावच्छेदकं वस्तुतस्तु नित्य। साधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेव ननु यथाऽरण्यस्य दंडादेः फलानुपधायके कारणतावच्छेदकतया दंडत्वादिजातिरूपा तत्रापि भविष्यत्यत आह तस्येति दंडादेः स्वरूपयोग्यतायां न काप्यक्षतिः तस्यानित्यत्वेन। फलोपधायकत्वाभावादिति भावः जन्यजलत्वजातेः जन्यजलमात्रवृत्तिजातेः तदवच्छिन्ने नित्यजलत्वजात्यवच्छिन्ने सर्वः। न चैवं जलाभावपरमाणुजलत्वं न स्यादिति वाच्यं जलपरमाणावपि वायवनुपगमात् ननु जलत्वावच्छिन्नं प्रति समवायसंबंधे

वर्णः शुक्ल इति स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यं अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् तस्य नित्यत्वा

वर्णः शुक्लः

स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेन्न जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्लः इति ननु शुक्लरूपवत्त्वेन

कारणतावच्छेदकत्वे०

न स्नेहस्यैव कारणत्वमस्तु अतिरिक्तजातिकल्पनापेक्षया लाघवादिति चेन्न जलत्वावच्छिन्नं प्रति स्नेहत्वेन कारणत्वे शीतस्पर्शत्वेन वा तत्र विनिगमनाविरहेण तदतिरिक्तजातिसिद्धेः लघुत्वमात्रस्य कल्पनीयेन विनिगमनाविरहाभावादिति केचित् धर्मादिकं प्रति आर्द्रेन्धनादेः कारणत्वे निर्विवादं आर्द्रत्वं च जलसंयुक्तत्वं तथा च जलसंयुक्तेन्धनत्वेन धनसंयुक्तजलत्वेन वा कारणत्वे तत्र विनिगमनाविरहात् जलत्वेन धनत्वयोः पार्थक्येन कारणतावच्छेदकतया जलत्वजातिसिद्धिरित्याहुः। परे तु स्थूलजलवृत्ति प्रत्यक्षसिद्धजलत्वरूपजात्यवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसाधारण। जातिसिद्धिः कार्यतावच्छेदककारणतावच्छेदकयोरैक्ये तत्र भावान्नित्यसाधारणस्य कार्यतावच्छेदकत्वे दोषाभाव इत्याहुर्नित्यानित्यपृथिव्यादावतिव्याप्तेरिति शेषः

ननु स्नेहवत्त्वेन जलत्वेन वा शीतस्पर्शवत्त्वेन जलत्वेन वा इत्यपि विनिगमनाविरहः ... स्यतेऽस्य तत्र लघुत्वमात्रमारोपयेति ६

प्रत्यक्षसिद्धजलत्वावच्छिन्नकार्यतानिरूपितजलमात्रवृत्तिकारणतायाः सकलजलवृत्तित्वस्वीकारे कार्यतावच्छेदककारणतावच्छेदकयोरैक्ये ... समवायेन कारणतावच्छेदकत्वमिति भावः २

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

12

ननु विषयत्वं न जातिः सामान्यादौ सत्त्वात् तत्स्वरूपं लक्षणमाह उपभोगेति यद्यपि साक्षादुपभोगसाधनत्वं द्व्यणुकादावप्रसिद्धं साक्षात्
परंपरासाधारणभोगसाधनत्वं परमाणावपीति द्व्यणुकादिब्रह्माण्डान्तमिति ग्रन्थविरोधः तथापि साक्षात्परंपरासाधारणभो
गसाधनत्वं विवक्षितं परमाणुरपि विषय एव कार्यरूपपृथिव्या एव विप्रकारेण विभजनात् कार्यपृथिवी विषयत्वेनोक्तेत्यादिना
प्रदर्शितमिति न तत्ग्रन्थविरोधः अत एवोक्तं तदुपभोगे साक्षात्परंपरया वा जनयत्येवेति कार्यजातमित्यत्र जातपदं संपादाय
तं अदृष्टाधीनमिति अत्र च कार्यमात्रं प्रत्यदृष्टस्य हेतुता न समवायसंबन्धेन घटाद्यधिकरणे कपालादौ समवायेन तदभावा
द्व्यभिचारात् यत्तु स्वसमवायिसंयोगेनादृष्टं कार्यमात्रे हेतुरिति तन्न शब्दरूपकार्याधिकरणे गगने अदृष्टसमवाय्यात्मसंयोगाभा ने॰२

विषयेति उपभोगसाधनं विषयः सर्वमेव हि कार्यजातमदृष्टाधीनं यच्च कार्यं यददृष्टाधीनं तत्तदुपभोगसाक्षात्परंपरया
वा जनयत्येवेति नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवति ॥

विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः ॥

शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः

वेन व्यभिचारात् परं तु स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुता बोध्या इदं तु बोध्यं अदृष्टस्य कार्यमात्रं प्रति हेतुता न
साक्षात् न हि सामग्रीसमवधाने अदृष्टविलंबे कार्यविलंबो दृष्टो येन तस्य साक्षाद्धेतुः स्यात् परं तु सामग्रीसंपादकतया प्रायः
परंपरयैव तदुपयोगः क्वचित्प्रत्यक्षसंसर्गादौ साक्षादेव तद्धेतुः अन्यथा सामग्रीसंपादकत्वस्यैवानुपपत्तेरिति एतदर्थमेव सा
९२ क्षात्परंपरासाधारणजन्यत्वबोधकमधीनपदमुपात्तं यददृष्टाधीनं यत्कार्यं यददृष्टाधीनं तत्तत्कार्यमित्यर्थः तदुपभोगं
तत्पुरुषस्योपभोगं तेन द्व्यणुकादिकार्यस्य तत्तत्पुरुषस्योपभोगसाधनत्वेन नन्वेवं सर्वस्यैव विषयत्वेन शरीरेन्द्रि
यविषयभेदेन पृथिव्यास्त्रैविध्यं न सिद्ध्येदित्यत आह शरीरेन्द्रिययोरपीति इति पृथिवीग्रन्थः ॥ ॥

का० मुं० टी० ३३

ननु जलेनीलत्वाभावे कथं नीलरूपप्रतीतिरत आह कालिंदीति स्वसमवायिसंयोगसंबंधेनोपश्लेषकया पृथिवीभागगतनीलत्वप्रतीतिः। कालिंदीजलादाविति भावः अत एवेति उपदर्शितसंबंधस्य जले नीलप्रतीतिप्रतीतिनियामकत्वादेवेत्यर्थः विपरीतेति नरो वदर्शितसंबंधघट कसंयोगनाशादिति भावः ननु जलेतस्य माधुर्यस्य च न स्वाभाविकत्वं औपाधिकत्वाभावे बीजकत्वादिस्तु नरं हरीतकीभक्षणोत्तरं अम्लस्येण माधु र्यवत्वेभावादिति पूर्वतो यम् कल्पनागौरवादिति अवयवरसा [illegible] जन्यस्य पृथिवीरसस्याग्निसंयोगस्य अदर्शनादेतद्दृष्टो धमात्रेण जलसंयोगस्यापि पृथिवीरसोत्पादकत्वस्वीकारे गतिरिति कार्यकारणभावस्य हरीतकीगतमधुररसस्य च कल्पने गौरवादिति भावः ननु लुज लेमधुरो रस सत्यापि जंबीरजलादेः अम्लत्वसिद्धे साम्लरसस्यापि स्वीकारे बाधकाभाव इत्यत आह पृथिवीत्वस्येति अम्लादिजनकतावच्छे दकत्वादिति यद्यपि पृथिवीत्वस्याम्लादेर्जनकतावच्छेदकत्वानवमधुरजनकतावच्छेदकत्वमप्यस्तीति तु लेन प्राचि हरीतक्यादिभक्षणोत्त रंजलेपि मधुरोपलब्धेस्तत्र मधुरस्वीकारस्यावश्यकत्वाज्जलत्वेनापि मधुरं प्रति हेतुत्वं कल्प्यते इति भावः ननु जंबीररसलिलादाव।

ननु शुक्लरूपमेवेति कुतः कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदकस्य पृथिवीत्वजातेरभा वात् जलेनीलरूपासंभवात् कालिंदीजलेनीलत्वप्रतीतिस्त्वाश्रयोपाधिकी आश्रयविषयतिविशेषधवलमोपलब्धेः॥ अथ जलेमाधुर्ये किं मानं नहि प्रत्यक्षेण कोपि रसस्तत्रानुभूयतेन च नारिकेरजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं त स्याश्रयोपाधिकत्वात् अन्यथा जंबीरकरवीरादाव म्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न हरीतक्यादिभक्षण स्य जलरसव्यंजकत्वात् न च हरीतक्यामेव जलोष्म संयोगाद्रसांतरोत्पत्तिरिति वाच्यं कल्पनागौरवात् पृथिवीत्वस्या म्लादिजनकतावच्छेदकत्वाज्जलेनाम्लादिकं जंबीररसादौ तावाश्रयतत्वोपाधिकी तत्प्रतीतिः॥ ॥रामचंद्राय नमः॥

अं

म्लाद्यनंतत्वाज्जलत्वेनाम्लादिरसेपि तुल्य वदेत्तु त्वेस्यादत आह जंबीररसादाविति स्वसमवायिसंयोगेन जंबीरगताम्लरसप्रतीति सङ्गत जलइत्यर्थः शुष्कपिजंबीरेम्लप्रतीतेन त्राम्लरसस्यावश्यकत्वेतस्यैव तद्द्रुतजले परंपरया प्रतीतिः हरीतकी तु मधुररसाभावान्नह रीतकीगतमाधुर्यस्य जले प्रतीतिरिति भावः कर्कटीभक्षणोत्तरं जलपाने तिक्त [illegible] रसस्यानुभवात्तिक्तरसोपि जु लेस्यादिति नु न जलपानात्पूर्वमपि कर्कट्यां तिक्तरसोपलब्धेः कर्कटीभक्षणोत्तरं रसनाग्रवर्तिपित्तदोषेण तीव्रतिक्तोपलब्धेर्वा घटकसिद्धत्वाच्च वस्तुतो निदाघपीतनिर्मलगंगाजलमाधुर्यस्यानुभवसिद्धस्यापलापासंभवान्मधुर एवेति गुरवः एतेन हरीत क्यादेनजलसंयोगेन माधुर्यमुपपद्यते ये न कल्पनागौरवं परं तु हरीतक्यां कषायस्यैव न मधुररसोपि स्तीति प्रतिजलव्यंजकस्य जल संयोगेन ननु रसांतरस्य प्रबलत्वात् यद्वा चित्ररूपवच्चित्ररसे मानाभावात् गुणविरोधेन नीरसेव हरीतकी रसप्रतीति नु अवयवे स्वरसत्वात्परं परं य [illegible] तेन जलसंयोगो हरीतक्यवयवगतमाधुर्यस्य व्यंजक इत्यादिना तम्॥ रामायनमः रामरामि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

समवायसंबंधेन कयापरसप्राचितु स्वसमवायिसमवेतत्वसंबंधेन मधुरस्य प्रतिबंधकः समवा यनमधुरसप्रतिस्वसमवायिसमवेतत्वसंबंधेन कषायरसः प्रतिबंधक इति गुरुचरणविशाधिः

13

राम ३३

शुक्लरूपवद्वस्त्वलक्षणे चेचिन्त्यमितिरभिप्रेत्याह अथवेति द्रव्यत्वव्याप्यजातिमादाय वाय्वादावतिव्याप्तिवारणाय रूपवद्वत्तीति।
यथा तथा वायुत्वंजातिस्तथा गेगनस्याह पृथिवीत्वादिनातिमादाय पृथिव्यादावति प्रसंगवारणाय नैमित्तिकद्र वत्ववदवृत्तीति सांसिद्धि
ति पदनादिवारणाय द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्याव्याप्यत्वमात्रेन नुद्रव्यत्वव्याप्यव्यापितदंतर्भाके रूपवद्भिन्नविशेषणेनैव
रूपवदादीनांवारणान्निवेशे प्रयोजनाभावात् यद्यप्येकस्याप्यवस्थितिकद्रवत्वस्येव रूपवत्त्वाने प्रवेशोयुक्तः एतेनापि वायुत्वादेर्वारणात्॥
एवंचद्रवत्ववद्वृत्तित्वाभावादेवघटत्वादीनांवारणसंभवेद्रव्यत्वसाक्षाद्व्याप्यमपि न देयमिति लाघवम् तथापि मूलेवर्णशुक्ल ३१
त्वादिनारूपघटितलक्षणस्योक्तत्वान्नघटितलक्षणपरिष्कारेमूलविरोधःस्यादिति तत्यागःकृतमिति ध्येयम्सूर्तत्वजातिमत्त्व
पमाणेनचेदं तेन जलत्वमद्द्रवत्वव्याप्यमूर्तत्वव्याप्यत्वेपि नक्षतिः जलघटाद्यन्यतरत्वमादाय घटादावतिव्याप्तिवारणायजातीति

अथवा नैमित्तिकद्रवत्ववद्वृत्ति रूपवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं अभास्वरशुक्लेतररूपासमानाधिकरणरूप
वद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः रसस्पर्शाविति जलस्य मधुर एव रसः शीत एव स्पर्शः तिक्तावृत्तिमधुरव

नवसकारादेनातिव्याप्तिरिति कस्मिन् ८=

रसस्पर्शौ जले मधुरशीतलौ॥

येत्यत्र रू ४

इति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वे शीतेत

रसस्पर्शवद्वृत्तिस्पर्शवद्वृत्तिजातिमत्वं च तदर्थः

कचिच्छुक्लरूपवद्वृत्तीतिपाठः तत्र शुक्लपदं रूपपदं वा संयानायातं एवमेव चाव्यावृत्तिरभास्वरशुक्लेतररूपवद्वृत्तिद्रव्य
त्वव्याप्यपदयोर्वैयर्थ्यं पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणाय भास्वरशुक्लेतररूपासमानाधिकरणेति जलत्वस्य शु॥
क्लरूपसामानाधिकरण्यासंभवइति शुक्लेतरेति तेजस्त्वमादायतेजस्यतिव्याप्तिवारणाय भास्वरेति शीतएवेति यद्यपि शी
तं गुणइति कोशात् क्लीवत्वेवोचितं तथापि विशेष्यस्य स्पर्शशब्दस्य पुंलिंगत्वात् लिंगतया निर्देशः शुक्लंरूपमित्यादेः शुक्ल
पदस्य क्लीवतयेवेति द्रव्यत्वसाक्षाद्व्याप्यपृथिवीत्वरूपजातिसामादाय पृथिव्यामतिव्याप्तिवारणाय तिक्तावृत्तीति तेजस्त्व
रूपजातिमादायतेजआदावतिव्याप्तिवारणायमधुरवद्वृत्तीति शेषं दर्शितदिशावसेयम् शीतेतरेति द्रव्यत्वरूपजातिम
२९ दायाति व्याप्तिवारणाय शीतेतरस्पर्शवद्वृत्तीति आत्मत्वादिकमादायात्मादावतिव्याप्तिवारणाय स्पर्शवद्वृत्तीति॥ राम ॥
यद्यपि शीतं गुणइति त्यनपुंसकलिंगतया पुंलिंगस्य शब्दस्य सामानाधिकरण्यं विरुद्धं तथापि ... [illegible]
विशेषविधानं ... [illegible] ... CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham ... [illegible]
... [illegible]
... [illegible]
... [illegible]

का० मुक्ता० दी० ३४

प्रपन्नवदिति षष्ठीसमर्थाद्भवितिरित्यभिप्रायेण पृथिव्या इवेत्यर्थः एवमग्रेपि जलीयं शरीरमिति ननु पार्थिवावयवैरुपष्टं भ्यत्वोध्यं तेन जलमात्रे हस्तपादादिमवस्थायाम्मसंभवेपि न क्षतिः ननु तादृश शरीरे मानाभावो नुपलंभादित्यत आह वरुण लोक इति तत्र च श्रुतिरेव प्रमाणमितिभावः गंधेति रसव्यंजके मनसि व्यभिचारवारणाय गंधाद्यव्यंजक इति कासारः सरः करकादीत्यत्रादिपदात्कूपादि परिग्रहः कठिनत्वादिति कठिनस्पर्शवत्वादित्यर्थः विलीनस्य तस्येति सप्तम्यर्थे षष्ठी । क्वचिद्विलीनयोरिति पाठः स तु करकेरेव विलीनतापादु वचनरूपायाजलत्व व्यंजकत्वादिति भावः ननु विलीनता नै

नित्यतादीति पृथिव्या इवेत्यर्थः तथाहि जलं द्विविधं नित्यमनित्यं च नित्यं परमाणुरूपं घणुकादिकं सर्वमनित्यं अवयवसमवेतं च अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात् पृथिवीतोपि विशेषमाह किं त्विति अयोनिजमेवेत्यर्थः जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धं इंद्रियमिति जलीय मित्यर्थः तथाहि रसनं जलीयं गंधाद्यव्यंजकत्वे सति रसव्यंजकत्वात् सक्तुरसाभिव्यंजकोदकवत् लालाजलं तु द्वार सन्निकर्षे व्यभिचार वार। ॥

नित्यतादि प्रथमवत्किंतु देहमयोनिजं इंद्रियं रसनं सिंधुर्हिमादिर्विषयो मतः ॥३७॥

[illegible] विषयं दर्शयितुं सिंधुरिति सिंधुः समुद्रः हिमं तु षारः आदिपदात्सरित्कासारकरकादिः सर्वेषां हि [illegible] हिमकरयोः [illegible] पार्थिवत्वमिति वाच्यं उष्मणा विलीनयोस्तयोर्जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्वृष्टं [illegible] जलाभिः [illegible] जलीयादृष्टोपगृहीतं [illegible] विशेषेण द्रव [illegible] तिरोधानात्कार्यं काठिन्यप्रत्य [illegible]

[illegible] त्यक्षणेनि नचन जलत्वव्यंजकं [illegible] विलीनेनस्मिन्निति तस्य तत्र मिन्नत्वे सतीत्यर्थः नव्यापि करकादिनाशे [illegible] तत्रैव द्रवत्व जलत्वयोः प्रत्यक्षं करकायां न दृष्टत्वात् तस्मात् यद्वृष्टमिति नव्याच करकादिनाशे द्रव्यांतरे जलत्वस्य प्रत्यक्षसिद्धत्वादुक्तव्याप्त्या करकादिषु जलत्वसिद्धिरितिभावः ननु हिमकरकयोः पार्थिवत्वाभावेऽ

[illegible]

राम ३४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जलत्वजातावनुमानान्तरं प्रमाणमाह एवमिति ननु जलत्वाभावेपि घृतचंदनादौ शैत्यस्य व्यभिचारेण कथं जन्यजलत्वेन तद्धेतुत्वमतआह घृतेति पृथिव्यामेव स्पर्श इत्युक्तमूलं साधयति तेजःसंयोगादिति तत्र जले विवेचयिष्यति च पाकासंभव मुपरिष्टात् घृतादावित्यादिपदेन तैलपरिग्रहः जलस्यैव स्नेह इत्यनंतरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः तेन घृतादौ स मवायेन स्नेहनिरासेन जल एवेति स्नेहस्याव्यान्तरविशेषाभावात् नोक्ताविति तदवच्छिन्नजनकतावच्छेदकं सांसिद्धिकद्र वत्वतावच्छिन्नजनकतावच्छेदकं तदेव जन्यजलत्वमेव तदवच्छिन्नजनकतावच्छेदकं जलत्वमिति भावः अथैवं रीत्या

एवं जन्यशीतजनकतावच्छेदकं जलत्वं जन्यजलत्वं वा बोध्यम् घृतचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तरवर्तिशीततर सलिलस्यैव तेजःसंयोगाज्जलेऽष्णप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासंभवात् स्नेहेति घृतादावपि तदन्तरव

स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्

र्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यम् द्रवत्वमिति सांसिद्धिकद्रवत्वं जातिविशेषः प्रत्यक्षसिद्धः तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः तैलादावपि तदन्तरवर्तिजलस्यैव द्रव।

परमाणुमात्रवृत्तिमात्रवृत्तिकं जलत्वमेकं परमाणुसाधारणं द्वितीयमिति जलत्वयोर्भेदे भेदाग्रहः कुत इति चेत् समभिव्याहृतयो र्व्यक्तिचक्षितत्वादिति एवमग्रेऽपि तैलादावित्यादिपदेन क्षीरपरिग्रहो ननु घृतस्य तत्र नैमित्तिकद्रवत्वस्य समवायेनैव सत्त्वात्। द्रवत्वमित्यनन्तरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः ननु तैले जलस्य तैलस्य च स्नेहः नानुकूलं न स्यात् जलस्य दहनप्रतिकू लत्वादत आह स्नेहप्रकर्षेणेति प्रकृष्टस्नेहः दहनानुकूलमेव अपकृष्टस्नेहस्यैव तस्य दहनप्रतिकूलत्वादिति भावः इतिवदतीति स्नेहनिरूपणावसरे इति शेषः ॥ ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इत्थंचेति अतिरिक्तकालसिद्धौ चेत्यर्थः सम्प्रतीति कालः सर्वाधार इति तेनेति दिक्कालविषयत्वसंबोधितत्वादित्यर्थः परा
परत्वबुद्धेरिति ज्येष्ठपरत्वप्रत्ययः कनिष्ठापरत्वप्रत्ययः स च परत्वापरत्वगुणविशेषाधीनः परत्वापरत्वे च साऽसमवायिकारणके
त्वकार्यत्वात् असमवायिकारणं चानयोः कालपिंडसंयोग एवेति परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया कालसिद्धिरिति
भावः परत्वापरत्वयोरित्यस्यैव वक्ष्यमाणत्वेपि तद्बुद्धिर्यथा तथा वने कालिकपरत्वापरत्वयोः प्रमाणं दर्शयितुं न च पिंडग
का० तरूपादेरेव परत्वापरत्वासमवायिकारणत्वमस्त्विति वाच्यं कालिकपरत्वापरत्वयोर्यावद्[illegible]उत्पत्त्याभिचारात् अत एव प
मु०टी० रत्वापिंडसंयोगस्य तत्र कारणत्वं यद्यसंयुक्तपदार्थयोः परत्वापरत्वयोरुत्पादेन[illegible]भिचारात् ननु [illegible]प्याकाशादि
३९ गात्ममनोभिः पिंडसंयोगस्य तथात्वमस्तु किं कालकल्पनेत्यत आह लाघवादिति आकाशादिभ्यां पिंडसंयोगस्य तथात्वे जीवा

इत्थं च तस्याश्रयत्वमेव सम्यक् प्रमाणांतरं दर्शयति परापरत्वेति परापरत्वबुद्धेरसाधारणं निमित्तं काल एव परापर
त्वयोरसमवायिकारणसंयोगाश्रयो लाघवादिति शिष्टः कल्प्यत इति भावः ननु एकस्य कालस्य सिद्धौ क्षणदिनमास

परापरत्वधीर्हेतुः क्षणादिः स्यादुपाधितः

यम्
वर्षादिसमयभेदो न स्यादत आह क्षणादिरिति कालस्यैकोपि उपाधिभेदात्क्षणादिव्यवहारविषयो भवतीति शे

श्री

त्मभिः प्रत्येकं विभिन्नगमना विरहादात्ममनसोरनंतत्वात् न तथात्वं किंतु लाघवादतिरिक्तः काल एव तथात्वेन कल्प्यत इति
भावः ननु यदि काल एक एव तर्हि क्षणकाष्ठादिनानाव्यवहारस्तत्र न स्यात् न चैकस्मिन्नेव घटे घटः कलशः कुंभ इति व्य
वहारवदत्रापि क्षणादिनानाव्यवहारे बाधकाभाव इति वाच्यं एकस्मिन्विरुद्धनानाव्यवहारायोगात् न हि घटत्वकलशत्वादिकं
मिथो विरुद्धं क्षणत्वदिनत्वादिकं तु विरुद्धमेव न हि दिनं क्षण इति प्रतीतिरस्तीति शंकते ननु एकस्येति समयभेदः समयभेद
व्यवहारः विभिन्नव्यवहारविषयत्वमिति यावत् एकस्मिन् विरुद्धनानाव्यवहारविषयत्वाभावादिति भावः उपाधिभेदा राम
दिति तथा चैकस्यैव कालस्य किंचिद्धर्मविशिष्टस्य क्षणत्वं किंचिद्धर्मविशिष्टस्य दिनत्वं न तु केवलकालस्येति भावः॥ ३९
इदमुपलक्षणं नानाशोभाधीनामेव क्षणत्वादिव्यवहारविषयत्वं न महाकालस्येत्यपि द्रष्टव्यं॥ ॥ ॥

15

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मूले जन्यानां जनक इति कार्यत्वावच्छिन्नं प्रति निमित्तकारणमित्यर्थः अत्र कालिकसंबंधावच्छिन्नकार्यतावच्छिन्नकार्यतानि
रूपितमधिकरणतया निमित्तत्वं काललक्षणं कालिकसंबंधावच्छिन्नेति करणाद्दिश्यधिकरणेतिकरणादीश्वरयोर्नातिव्या
प्तिरिति बोध्यं ननु कार्यमात्रं प्रति कालस्य निमित्तकारणत्वे किं मानमिति चेदत्राहुः अद्य घटो भविष्यति श्वः घटो भविष्यतीत्या
दिप्रत्ययेषु तत्कार्यत्वस्याधिकरणत्वेन कालो विषयीक्रियते तत्तुल्याधिकरणत्वेन संचारविषयस्य च तदुत्पत्तिहेतुत्वनियमात् न
तूत्पत्तिहेतुत्वस्य तद्धेतुत्वव्याप्यत्वात् एवं च तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे यद्विशेषयोरिति न्यायात् कार्यमात्रं कालस्य यो५
हेतुतासिद्धिरिति साच हेतुता निमित्तकारणत्वेन नच कालस्य कार्यमात्रहेतुत्वं न संभवति स्वसमवेत द्वित्वपृथक्त्वसंयोगवि
रत्वादेर्त्वं प्रति कालस्य समवायिकारणत्वे न तद्भिन्नत्वघटितत्वनिमित्तकारणलक्षणस्य आकाशादिष्वव्याप्तेरिति वाच्यं समवायसंबंध
न तस्य द्वित्वादिकं प्रति समवायिकारणत्वेपि कालिकसंबंधेन द्वित्वादिकार्यं प्रति निमित्तकारणत्वस्यानपायात् एवमेव कार्यमात्रे दि

कालं निरूपयति जन्यानां जनक इति तत्र प्रमाणं दर्शयितुमाह जगतामाश्रय इति इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पं

जन्यानां जनकः कालो जगतामाश्रयो मतः

दादिकं पदार्थविषयीकरोति तदा सूर्यपरिस्पंदादिना पदार्थे संबंधो वाच्यः स च संयोगादिर्न संभवति इति काल एव संबंधघटक इति क१

शोपि निमित्तकारणत्वं बोध्यं मुक्तावल्यां तत्रोलिनत्रः ॥ जगतामाश्रय इति कालः सर्वाधारत्वेन कालसिद्धिरि
ति भावः नन्वेतादृशप्रतीतिर्दिग्विषयिणी भवतु अतिरिक्तकालकल्पने गौरवात् अन्यथा नित्यकेवलं मनसा प्रतीत्या कालः सिध्यते परं
तु प्रमाणांतरेणासिद्धे काले प्रत्यक्षप्रतीतिर्न संभवतीत्यत आह इदानीमित्यादिना सूर्यपरिस्पंदादिकमिति इदानीं तदानीमिति
प्रतीतिर्महाकालं विषयीकरोतीति तु न वाच्यं तथा सतीदानीं घटो न तदानीमिति प्रत्ययानुपपत्तेः नच तत्तत्क्रियाविशिष्टमहाकाल
एवेदानीमित्यादिप्रत्ययविषयः तथाच इदानीं घटो न तदानीमित्यस्य तत्क्रियाविशिष्टमहाकाले घटो न तत्क्रियाविशिष्टमहाकाले त४
इत्यर्थ इति वाच्यम् तथा सति तत्क्रियाविशिष्टमहाकालादेस्तथात्वे न तत्क्रियायामेव तादृशप्रतीतिविषयत्वसंभवेन तत्ता
दिति इतीत्यंतं तत् स्वाश्रयतपनसंयोगिसंयोग एव संबंधो वाच्य इत्यत्रेति शेषः नचाकाशमेव संबंधघटकमस्त्विति वाच्यं आ
काशस्यात्मनो विनिगमनाविरहेणातिरिक्तैककालस्यैवोचितत्वात् ॥ ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ज्ञानेन्द्रियाधिष्ठातृत्वमात्मनः
संबंधेनानिष्टावच्छेदकतानिरूपिता
वच्छेदकतासंबंधेन=२

का० मु० दी० ४२ इंद्रियाद्यधिष्ठातेति मूलमात्मप्रमाणपरतया व्याचष्टे इंद्रियाणामिति आदिपदसंग्राह्यमाह शरीरस्येति परंपरया जनकतासंबंधेन अवच्छेदकतासंबंधेन वा चैतन्यं ज्ञानवत्त्वं एतेनात्मनि प्रमाणमुपदर्शितं अचेतनं चेतनाधिष्ठितमिति क्वचिन्नीतिमाश्रित्य अहं सुखीत्यादीत्यादिना अहं जानामि करोमीत्यादि संग्रहः नचात्मानात्मनो भेदस्य प्रत्यक्षविरोध इति वाच्यं आत्मतत्त्वविवेके परात्माभिप्रायेणाभाष्यव्याख्यानस्य प्रदर्शितत्वात् विप्रतिपन्नं प्रतीति अहमिति प्रतीतेः शरीराद्यतिरिक्तविषयत्वे विप्रतिपन्नं प्रतीत्यर्थः नैयायिकमते यथा मुक्तात्मनां ज्ञानाभावेन न ज्ञानाधिकरणत्वरूपं चैतन्यं तथा मत्मतेपि मृतशरीरस्य न चैतन्यमिति शरीरमेवात्मेति वादी चार्वाकः शंकते चैतन्यमिति ज्ञानादिकं ज्ञानाधिकरणत्वं तदभावे ज्ञानाद्यभावे न

इंद्रियादीति इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकत्वमर्थः यद्यप्यात्मन्यहं सुखीत्यादिप्रत्ययविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रतिप्रत्यक्षमत एव शरीरादिभिन्नत्वमात्मनीति गोचर इति प्रतिपादयितुं न शक्यते अतः प्रमाणान्तरं दर्शयति करणमिति कुठारादीनां छिदादिकरणानां कर्तारमंतरेण फलोपधानं न दृष्टं एवं चक्षुरादीनां ज्ञानकरणानामपि फलोपधानं कर्तारमंतरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते ननु शरीरस्यैव कर्तृत्वमस्त्वत आह शरीरस्ये

इंद्रियाद्यधिष्ठाता करणं हि सकर्तृकं शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः

ति ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावेन ज्ञानाभाव इति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैः कस्माद्विना प्रत्यभिज्ञा न नच पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यतामिति वाच्यं अनंतसंस्कारकल्पनायां गौरवप्रसंगात् एवं शरीरस्य चैतन्ये बालकस्य स्तनपाने प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य तद्धेतुत्वात् तदानीमिष्टसाधनत्वानुभावकाभावा

त्तन्मते मृतशरीरे चैतन्याभावः किंनिबंधनः मन्मते तु प्राणविशिष्टस्यात्मनो विरह एव तत्र हेतुरित्यत आह प्राणाभावेति तथा च लाघवात्प्राणाभाव एव चैतन्यविरहे प्रयोजक इति भावः चार्वाकमतं परिहरति नेति स्मरणाऽनुपपत्तेरिति अनुभवाश्रयस्य बालशरीरस्य तदानीमभावादिति भावः ननु बाल्यशरीरे तदा स्थैर्येस्य तत आह शरीराणामिति संस्कारमुत्पद्यतामिति तथा च स्वप्रयोज्यसंस्कारवत्त्वसंबंधेन बाल्यशरीरसमवेतानुभ वस्य स्थविरशरीरे सत्त्वान्न स्मरणानुपपत्तिरिति भावः गौरवस्य फलमुखत्वाद्दूषणांतरमाह एवमिति तस्यादिस्तन्यहेतुमाह इष्टेति तद्धेतुत्वात् प्रवृत्तिहेतुत्वात् तदानीं स्तनपानप्रवृत्त्यव्यवहितपूर्वकाले

16

राम ४२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुखदुःखादीति आदिना ज्ञानेच्छा[illegible]धर्माधर्मभावनापरिग्रहः यद्यप्यात्मत्वस्यात्मान्यप्रमत्तत्वेपि स्वात्मनिरूपितो मानसप्रत्यक्षत्वमस्त्येव तथापि सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन जातित्वे तन्नास्तीत्यत आह अनेकसमवेतत्वघटितजातित्वग्रहे अनेकव्यक्तिग्रहहेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव तत्र प्रमाणमित्यभिप्रायेण सुखादिकारणतावच्छेदकतया तत्सिद्धिः प्रदर्शिता अपृथक्स्वत्वावच्छिन्नं प्रत्यात्मत्वेन कारणत्वे मानाभावः सुखदुःखद्वेषभावनाधर्माधर्मान् प्रति यथाक्रमं धर्माधर्मानिष्ठसाधनताज्ञाना[illegible]नुभवविहितनिषिद्धकर्मणां समवायसंबंधेन निमित्तकारणत्वावश्यकत्वेपि अतिप्रसंगभंगात् भावकार्याणां समवायिकारणकत्वनियमस्य तद्व्यक्तित्वेन तद्व्यक्तिसमवेतत्वमिति तद्व्यक्तित्वेन वा समवायिकारणतासंभवादित्यपि नादिति चेदत्र प्राञ्चः कार्यमात्रवृत्तिजातेः समवायिकारणकार्यतावच्छेदकत्वनियमेन तादृशकार्यकारणभावस्यावश्यकत्वात् न

आत्मत्वं निरूपयति आत्मेति आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्धेति ईश्वरेपि सा जातिरस्त्येव अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इत्यस्याप्रयोजक-

॥आत्मा॥

त्वात् अपरे त्वीश्वरे सा जाति[illegible]प्रमाणाभावात् न च दशमद्रव्यत्वापत्तिः ज्ञानवत्वेन विभजनादित्याहुः ॥ रामाय नमः ॥

च तावतापि सुखत्वावच्छिन्न[illegible]त्वेनैव कारणत्वमस्तु अदृष्टादेर्निमित्तकारणत्वादेवातिप्रसंगविरहादिति वाच्यं आ-प्तत्वप्रयुक्तधर्मैः कारणतावच्छेदके सम्भवति व्याप्यधर्मेण कारणत्वकल्पनायामन्याय्यत्वादित्याहुः वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुत्वमावश्यकमिति ननु तथाप्यात्मत्वजातेः भगवत्यात्मसाधारण्ये मानाभाव इत्यत आह ईश्वरइति आत्मत्वावेदकश्रुत्यादिप्रमाणात् आत्मपदव्यवहारादितिभावः ननु तर्हीश्वरे सुखदुःखाद्युत्पत्तिः कुतो न भवतीत्यत आह अदृष्टादीति [illegible]त्यभिप्रायः ननु नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमेनेश्वरस्य स्वरूपयोग्यत्वे फलोपधानापत्तिरत आह [illegible] अप्रयोजकत्वादिति तत्र परमाणोः स्नेहानुत्पत्त्या नादृशनियमे मानाभावादितिभावः न त्वीश्वरे अदृष्टं कुतो नोत्पद्यते इति चेन्न मिथ्याज्ञानरूपकारणाभावात् मिथ्याज्ञानस्यादृष्टहेतुत्वे च मुक्तात्मन्यदृष्टोत्पत्तिप्रसंगः वेदस्यात्मपदादेः नोनादिमतिलक्षणावत्तिरित्यस्य स्वरसआदृश्यत्वेन सूचितः ॥ ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कथं स्मृतिरिति मूलेनेन्द्रियाणां चैतन्यपक्षे स्मरणाभावप्रसंगात् इत्यस्य हेतोरनुक्तेः स्वयं हेतुं पूरयन्नर्थमाह पूर्वं चक्षुषेति
नन्विन्द्रियान्तरेण वस्तु निर्विषयस्तत्राह अन्येनानुभूतस्येति तत्र हेतुमाह अनुभवेति यद्यपि अधिकरणयोः कार्यका
रणभावविरहात् सामानाधिकरण्येन स्मृतिविकलानां तथापि यत्र विषयतासंबंधेन स्मृतिस्तत्र विषयतासंबंधेनानुभव
इतीदृश विषयत्वघटितसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावग्राहकः आत्मनिष्ठसामानाधिकरण्यघटि
तकार्यकारणभावेन घटाद्यनुभवोत्तरं घटादिविषयतासंबंधेन स्मृत्यापत्तेर्वारणादिति चक्षुः कर्तृकानुभवस्य घ
टस्यादिन्द्रियान्तरकर्तृकं स्मरणं तत्र नानुपपन्नमित्याशंकां निराकरणाय तयोः किंः समवायघटितसामानाधिकर
ण्यप्रत्यासत्त्येत्यर्थः चैत्रस्य घटानुभवकाले मैत्रस्य घटस्मरणवारणाय तत्पुरुषीयत्वनिवेशो पुरुषभेदेनाने(

कथमिति पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात् अनुभवितुरभावात् अन्येनानुभूतस्या
न्येन स्मरणासंभवादिति भावः अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति ननु चक्षुरादीनां चै

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्

तन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह मनोऽपीति न तथा न चेतनमित्यर्थः ज्ञानादीति मनसोऽणुत्वात्त
द्गतमहत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादि प्रत्यक्षानुपपत्तेरित्यर्थः यथा च मनसोऽणुत्वं तथाग्रे वक्ष्यते॥१२॥

न कार्यकारणभावकल्पने गौरवात् समवायघटितसामानाधिकरण्यप्रत्यासत्त्या तयोर्हेतुमद्भावस्वीकारादिति भाव
इति ध्येयम् इन्द्रियाणां चैतन्यपक्षे योदोषः सोऽत्र कल्पे नास्तीति सूचयितुं नित्यस्येति ननु न तथेत्यत्र मूले तच्छब्देन पूर्वो
भावद् पस्थितचैतन्यस्यैव परामर्शः स्यात्तथा चासंगतिरत आह न तथा न चेतनमिति अनध्यक्षं तदा भवेदिति मूलेन
मनसश्चैतन्ये ज्ञानादेरप्रत्यक्षत्वमुक्तं तत्र हेतुं प्रदर्शयन्नर्थमाह मनस इति तस्य देति ज्ञानादिप्रत्यक्षानुपपत्तेरित्य राम
र्थः ननु मनसोऽणुत्वमेवासिद्धमत आह यथा चेति अग्रे वक्ष्यत इति अयोगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यत इ ५२
तिग्रंथेन मनसोऽणुत्वं साधयिष्यत इत्यर्थः॥ ॥ ॥श्री॥

का० मु० टी० ५२

श्री

17

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यायवहितोत्तरक्षणे फलजनकत्वं न तु करणत्वं ॥ ५

ननु प्रवृत्त्यन्यथानुपपत्तिस्तव मतेपि समानेत्याशंक्य स्वमते प्रवृत्त्यन्यथानुपपत्तिं परिहरति अन्मतेत्विति अन्मदीयेति इष्टसाधनता।
इत्यादिरीत्यर्थः अत्र नु स्तनपानप्रवृत्तत्वनुकूले इष्टसाधनतास्मरणेन तु आत्मनो नित्यत्वं साधयति इत्यं चेति प्रागभावस्य नाशसंभवादा
ह भावेति नाशासंभवादिति नाशे प्रतियोग्यभाववत्वेन हेतुत्वादात्मनोऽनादित्वेन जन्यभावत्वरूपहेतोरसंभवेन नाशासंभवादिति
भावः ननु चक्षुरादीनामेव ज्ञानादौ करणत्वं कर्तृत्वं चास्त्विति करणत्वं हि व्यापारवत्वे सति कारणत्वमभवति हि चक्षुरादौ चक्षुः
संयोगादिरूपव्यापारवत्त्वे चाक्षुषज्ञानाव्यवहितपूर्वकालवर्तित्वं ननु फलोपहितत्वे राजसूयेन स्वाराज्यकामो यजेतेत्यादौ।
यागादिनिष्ठकरणत्वादावव्यसंगात करणत्वकारणत्वयोरविशेषप्रसंगाच्च कर्तृत्वं च यथा पि क्रियानुकूलकृतिमत्वं न संभव

मन्मते तु जन्मांतरानुभूते इष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः नच जन्मांतरानुभूतमन्यदपि स्मर्येतेति वाच्यं उद्बोधका
भावात् अत्र तु नाथस्याजीवनादृष्टमेवोद्बोधकं कल्प्यते इत्थं च संसारस्यानादितया ऽऽत्मनोऽनादित्वसिद्धावनादिभावस्य

तथात्वं चेदिंद्रियाणामुपघाते कथं स्मृतिः ॥

नाशासंभवान्नित्यत्वं संभवतीति बोध्यं ननु चक्षुरादीनामेव ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आ
ह तथात्वं चेदिति तथात्वं चैतन्यमुपघाते नाशे सति अर्थाच्चक्षुरादीनामेव ॥ ॥श्री॥ ॥

त्यचेतने च चक्षुरादौ तथापि पूर्वपदिद्रणानि विक्षस्यात्मनः कृत्यादीनामात्मसमवेतत्वस्यानंगीकरणात् कस्माश्रयत्वमपि चक्षु
रादीनामस्तित्यर्थः नन्वेकस्यैव करणत्वे कर्तृत्वे कर्तृक रणादिव्यवहारभेदोऽनुपपन्न इत्यत आह विरोध इति विरोधे भि
न्नाधिकरणवृत्तित्वेन यावत् कर्तृत्वकरणत्वादिलक्षणोपाधिभेदात् कर्तृकरणादिव्यवहारभेदोपपत्तिरित्याशयः नचै
तत्पामित्यत्र विशेष्यतयोपस्थितस्याभावस्य तच्छब्देन परामर्शासंभवाद्धार्थचेष्ट तथात्वं चेतन्यमिति उपघातपदस्य लोके
ऽवयवनाश एव प्रयोगादाह नाश इति मूले उपघाते कथं स्मृतिरित्युक्तम् तत्रोपघातः केषामित्याकांक्षायाः सत्वा
दाह अर्थादिति तथा चैकमेवेंद्रियाणामिति पदस्याकांक्षावशादुभयत्र संबध्यत इत्याशयः ॥ रामायनमरामचंद्राय

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नीलाकारेपि पीताकारस्यापि स्मृतेर्दोषो नास्तीत्यर्थः अनेनातिक्रान्तगुरोर्मुख्यस्य... घटेऽङ्कुरादिसमूहालम्बनानामपि चित्राकारज्ञापत्तेः नचेष्टापत्तिः चित्ररूपवच्चित्राकार
ज्ञानस्वीकारेपि चित्रस्साधनं गीकारेणादृष्टत्वभावात् चित्रस्साधाकारज्ञानस्वीकारस्य गौरवपराहतत्वादिति भावः॥१

गर्भस्थपदे गर्भेपि न्यस्यापुपलक्षणं॥२

ननु समूहालम्बने नीलाकारो न वा पीताकारोऽभ्युपेयते परं तु चित्राकार एवेति नोक्तदोष इति पूर्वोक्तवासनासंक्रमं मुख्यतया दूषयति नचेति मातृपुत्रयोरिति मात्रानुभूतस्य गर्भस्थेन तनयेन स्मरणप्रसंगादिति भावः उपादानेनानुभूतमुपादेयेन स्मर्यत इत्येतदपि निरस्यति नचेति शंकते उत्तरस्मिन्निति तदुत्पादकेति वासनोत्पादकेत्यर्थः चित्तमेवेति ज्ञानानामेव संस्कारोत्पादकत्वे तेषामानन्त्यात् संस्कारानन्त्यापत्तिरित्यर्थः शंकते क्षणिकेति अतिशयविशेषः शक्तिविशेषः उत्तरोत्तरज्ञानानुकूलतया इति शेषः गौरवादिति सर्वथा मिथ्या... ज्ञानात्क्षणिकानन्तशक्तितत्प्रागभावध्वंसकल्पने गौरवादित्यर्थः ननु क्षेत्रस्थबीजादंकु

का० मु० दी० ५२

न वा वासनासंक्रमः संभवति मातृपुत्रयोरपि वासनासंक्रमप्रसंगात् न चोपादानोपादेयभावो नियामक इति वाच्यं वासनायाः संक्रमासंभवात् उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात् चित्तमेवोत्पादकमिति चेन्न तदा संस्काराणामानन्त्यप्रसंगः क्षणिकचित्ते तदतिशयविशेषः कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवाच्च एतेन क्षणिकशरीरे स्मृतिचैतन्यमपि प्रत्युक्तम् गौरवात् अतिशये मानाभावाच्च बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्व

रोत्पत्तिर्न कुसूलस्थबीजाद तोंकुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्वमंगीक्रियते कुर्वद्रूपत्वं चांकुरजनकतावच्छेदकतया सिद्धो जातिविशेषः स च फलोपधायकक्षणिकसमर्थबीजमात्रवृत्तिबीजत्वव्याप्यः कल्प्यते एवमत्रापि कुर्वद्रूपत्वेन वक्षणिकशरीरे स्मृतेरन्यशरीरनिष्ठवासनोत्पादकत्वं वाच्यमतः आह बीजादावपीति उपपत्तेः कस्माच्चिद्बीजादंकुरोत्पत्तिः कस्माच्चिन्नेति नियमोपपत्तेः कुर्वद्रूपत्वाकल्पनादिति कुसूलस्थबीजादिषु धरणिसलिलसंयोगादिरूपसहकार्यभावादेवांकुरानुपपत्तेः कुर्वद्रूपत्वे तद्रूपेण जनकत्वं च न कल्प्यते प्रमाणाभावादिति भावः॥ ॥ ॥ राम ५३

18

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विज्ञानवादी शंकते नन्विति विज्ञानमेवेति आत्मनिरूपणप्रस्तुत वादात्मेत्युक्तं वस्तुमात्रस्य तन्मते विज्ञानरूपत्वादिति बोध्यं अत्र विज्ञानत्वं प्रमेयत्वसत्त्वस्य व्यापकं त्वेति विप्रतिपत्तिः तत्र विधिकोटिर्योगाचारस्य निषेधकोटिर्नैयायिकस्येति ध्येयम् द्विविधं विज्ञानं प्रवृत्तिविज्ञानमालयविज्ञानं चेति तत्र घट इत्यादि विज्ञानं प्रवृत्तिविज्ञानं अहं जानामीत्यालयविज्ञानं तदेवात्मा तस्य विज्ञानस्य ननु सुषुप्तावात्मा नास्ति चेत् स्वेति नु विज्ञानस्य क्षणिकत्वेन नाशाद् विज्ञानान्तरस्य च तदानीमुत्पादकाभावादत आह (पूर्वपूर्वेति ननु विज्ञानस्य क्षणिकत्वेन तदाश्रितसंस्कारस्यापि क्षणिकत्वात् कालान्तरे स्मरणं न स्यादिति आशंकां परिहरति स्मरणमिति विज्ञानस्य जगद्विषयत्वे यत्किंचिद्विषयत्वं वाभिप्रेतमिति विकल्प्याद्यं दूषणमाह नस्येति द्वितीयं तावदाह यत्किंचिदिति आत्मस्वरूपवि(

ननु विज्ञानमेवात्मा तस्य स्वतः प्रकाशरूपत्वाज्जडत्वं ज्ञानसुखादिकं तस्यैवाकारविशेषस्तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्तावप्यालयविज्ञानधारा निराबाधैव स्मरणमप्युक्तवासनायाः संक्रमादेव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न तस्य जगद्विषयत्वे सर्वज्ञत्वापत्तिः यत्किंचिद्विषयत्वे विनिगमकाभावः सुषुप्तावपि विषयावभासप्रसंगश्च तदानीं निराकारचित्सन्ततिरनुवर्तत इ
स्व ५ ति चेन्न तस्याः प्रकाशत्वे प्रमाणाभावात् अन्यथा घटादीनामपि विज्ञानत्वापत्तिः न च घटादेर्विज्ञानातिरिक्तस्य वस्तुनोऽभावादिति वाच्यं घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेषस्तावद्यं विज्ञानस्येति चेत् किमयमाकारविशेषोऽतिरिच्यते विज्ञानान्न वा आद्ये समायातं विज्ञानव्यतिरिक्ते न नातिरिच्यते चेत्तर्हि समूहालम्बने नीलाकारः पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात् अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात् इत्यन्या वियोगावधारणस्यैव दुष्पथत्वात्॥ ॥

ज्ञानस्य सविषयकत्वे दूषणमाह सुषुप्ताविति शंकते तदानीमिति निराकाराविषयिणी चित्सन्ततिः विज्ञानसंततिः प्रकाशत्वे ज्ञानत्वे ज्ञानत्वस्य विषयिताव्याप्यत्वादिति भावः अन्यथा प्रमाणाभावे विज्ञानत्वस्वीकारे आकारस्य विज्ञानातिरिक्तत्वमनतिरिक्तत्वं वेति विकल्प्याद्यं दूषणमाह नहीति समायातमिति द्वितीयमाह समूहालम्बन इति नीलपीते इति समूहालम्बनस्यार्थः स्यादिति तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति भावः एतदेवोपपादयति स्वरूपतो विज्ञानस्येति विज्ञानस्वरूपस्यार्थः अविशेषात्॥ एकत्वात् ननु नीलाकारः पीताकारश्चाभिन्न एव विज्ञानस्वरूपत्वात् नीलत्वपीतत्वयोर्भेदात् न च तयोरपि विज्ञानस्वरूपत्वादभेदः नीलत्वादेरपोहरूपत्वेन विज्ञानेनाभेदासंभवादिति मत्वा शंकते अपोहरूप इति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का० मुं०टी० ४४

आत्ममात्रस्य नित्यविज्ञानस्व
वेदांती शंकते अस्तु तर्हि नित्यात्मिकविज्ञानमिति आत्मनः क्षणिकविज्ञानस्वरूपत्वपक्षे इत्यर्थः आत्ममात्रस्य नित्यविज्ञानस्व रूपत्वमीश्वरस्यैव वेति विकल्पौ दूषयन्नाह न स्वेत्यादि दर्शितत्वादिति न स्थगद्विषयकत्वात्सिद्धं येन दर्शितत्वादित्यर्थः त
रूपत्वमीश्वरस्यैव वेति विकल्पौ दूषयन्नाह तस्येत्यादि दर्शितत्वादिति जगद्विषयकत्वेनवानित्यत्वमिति किंचेदि
थ्याच जीवस्य तथात्वासंभवात्तात्मनात्रस्य नित्यविज्ञानरूपत्वमितिभावः ननु तर्हि जीवस्य जगद्विषयकत्वेनवानित्यत्व इत्यर्थः किंचेदि
षयकत्वं न मः परंतु यद्विषयकत्वं यत्र जीवे नुभवसिद्धं तत्तद्विषयकत्वमतआह सविषयकत्वस्येति ननु संज्ञान मनंत ब्रह्मे
तिश्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमतआह सत्यमिति ननु जीवब्रह्मणोरैक्यान्नित्यविज्ञानस्वरूपत्वं जीवस्य निराबाध
मित्यतो जीवब्रह्मणोर्भेदं साधयति ज्ञानाज्ञानेति सुखित्वादीत्यादिना दुःखित्वपरिग्रहः सुतरामिति जीवात्मनो नानात्वसिद्ध

अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुते
अस्तु तर्हि नित्यात्मिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुते
रिति चेन्न तस्य सविषयकत्वासंभवस्य दर्शितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयकत्वस्याप्यननुभवात्तो
ज्ञानभिन्नो नित्य आत्मेति सिद्धं सत्यं ज्ञानमिति ब्रह्मपरं जीवेषु नोपपद्यते ज्ञानाज्ञानसुखित्वादिभिर्जीवानां भेदसिद्धेः॥
सुतरामीश्वरभेदोऽन्यथा बंधमोक्षानुपपत्तेः योगीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वप्रतिपादयन्स्तौति
अभेदभावनयैव यतितव्यमिति भावः अत एव सर्व एवात्मानः समर्पिताः इति श्रूयते मोक्षदशायामज्ञाननिवृत्तौ अ
भेदोजायतइत्यपि न भेदस्यनित्यत्वेन नाशायोगात् भेदनाशेऽपि व्यक्तिद्वयं स्यादेव न च द्वित्वमपि नश्यतीति वाच्यम्

ईश्वरजीवात्मनोर्भेदः सिध्यती
वीश्वरस्यैकस्यानेकजीवात्मकत्वासंभवादेकत्वानेकत्वयोर्विरोधादितिभावः ईश्वरभेदः ईश्वरजीवात्मनोर्भेदः सिध्यती
त्यर्थः अन्यथा ईश्वरस्य जीवात्मकत्वे बंधमोक्षेति कश्चित्संसारी बद्धः कश्चिन्मुक्त इति व्यवस्थानुपपन्ना स्यादित्यर्थः
चैत्रमैत्रात्मनोरीश्वरस्य रूपयोरैक्यादितिभावः ननु कथं तर्हि तत्त्वमसीत्यादि तच्छब्दप्रतिपाद्यब्रह्मणः युष्मच्छब्द राम ४४
प्रतिपाद्यजीवस्याभेदबोधको वेदः प्रमाणमित्यतआह योगीति मोक्षकाले जीवात्मनां ब्रह्मणा सहाभेद इत्यपेक्षते इति
मतं निरस्यति मोक्षेति भेदस्यानित्यत्वमभ्युपेत्यापि मोक्षकाले जीवब्रह्मणोर्भेदं व्यवस्थापयति भेदनाशेऽपीति भेद ॥
सत्वव्यक्तिद्वयं निर्विवादमेवेत्यपि नाशंकितम्॥ ॥

19

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मत्रवदंति यस्तत्क्षणिकमिति व्याप्तग्राभातः क्षणिकत्वात्तदनुरोधेन च कुर्वद्रूपत्वं तद्रूपेण कार्यप्रतिनियमावश्यकम् न च तादृशाया
मानाभावः तादृशव्याप्त्यस्वीकारे कुसूलस्थबीजादंकुरोत्पत्तिवारणाय धरणिसलिलसंयोगादीनां सहकारित्वकल्पने गौरवा
त् तादृशव्याप्तिस्वीकारे तु कुर्वद्रूपत्वेन हेतुत्वकल्पनात् कुसूलस्थबीजे कुर्वद्रूपत्वाभावादेवांकुरानुत्पत्तेर्न सहकारिताकारणा
नराणामिति लाघवात् न च क्षणिकत्वमतेपि बीजस्य धरणिसलिलसंयोगादेवांकुरकुर्वद्रूपत्वेन हेतुत्वमित्यत्र विनिगमनाविरहेण
सर्वेषां सहकारिणां कारणत्वकल्पनमावश्यकमिति वाच्यं मन्मतेंकुरं प्रति बीजानां धरणिसलिलसंयोगादिसहकारिणां
च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात् कुर्वद्रूपत्वानंगीकारे तु बीजत्वधरणिसलिलसंयोगत्वादिनानानाहेतुत्वकल्पने गौ
रवादिति तदसत् ईदृशगौरवाधेद्व्याप्त्या क्षणिकानंतपदार्थकल्पने प्रतिगौरवात् न च लाघवात् कुर्वद्रूपत्वेन तेषामेकहेतु

श्रीमते रामानुजाय नमः श्रीरामचंद्राय नमः श्रीरामः॥

निवादस्य प्रत्यधिकरणत्वात् फलमुखगौरवं न दोषाय अत्र गौरवं तु दोषाय खलु कुर्वद्रूपत्वेन
कार्यकारणभावे प्रमाणाभावादिति भावः=१

सर्वस्य क्षणिकत्वपक्षे सोयं घट इति प्रत्यभिज्ञानु
पपत्तिबलेन=२

त्वसिद्धावीदृशगौरवं न दोषाय फलमुखत्वादिति वाच्यं फलमुखगौरवस्यापि दोषत्वात् किंच जगतः क्षणिकत्वे स एवायं
घट इति प्रत्यभिज्ञानुपपत्तिः पूर्वकालीनघटाभेदस्य तत्कालीनघटेऽभावात् न च तज्जातीयाभेद एव तादृशप्रतीतेर्विषयः स
न्मतेऽपि तेषामपि क्षणिकत्वेन पूर्वकालीनघटवृत्तिघटत्वस्य तत्कालीनघटेऽभावात् एतेन जगतः क्षणिकत्वे नाशत्वा
वच्छिन्नं प्रति सत्त्वेनैकमेव हेतुत्वमिति लाघवमप्यपास्तम् यद्विस्थिरपदार्थांगीकारे एकस्मिन् यदा येषां सामर्थ्यमसामर्थ्यं
च विरुद्धमनस्तत् इदं इति तदपि न एकस्मिन्नेककालावच्छेदेन सामर्थ्यतदभावयोर्विरुद्धत्वे यथा कालभेदेन तत्स्वीकारे
बाधकाभावात् पूर्वापरकालीनधर्मिणोरभेदे तद्धर्मयोः सामर्थ्यासामर्थ्ययोर्भेदोऽनुपपन्न इति मन्मते धर्मधर्मिणो
रभेदादिति न च घटत्वेन घट इत्यादिप्रतीतीनामप्रामाण्यापत्या धर्मधर्मिणोरभेदस्य वक्तुमशक्यत्वादिति दिक् ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का॰
मु॰ टी
४५

प्रकृतिरिति मूलप्रकृतिरित्यर्थः।
सांख्यमतं दूषयितुमुपन्यस्यति एतेनेति पूर्वोक्तयुक्त्यात्मनो ज्ञानवत्त्वसाधनेनेत्यस्य मानयुक्त्या चेत्यर्थः ... अनुकूलकृतिमत्त्वलक्षणकर्तृत्वस्य तन्मतेन तत्करणधर्मत्वादिति ध्येकर्त्रीति कर्तृत्वं चात्र कर्तृभूतांतःकरणप्रकृतित्वे ... नभवतीत्येभायम् पुष्करपलाशवदिति यद्वा यत्रवदित्यर्थः तथा च यथा पद्मपत्रं नभसा लिप्तं न भवति तथा पुरुषः कर्तृत्वाद्याश्रयो न भवतीत्येभायम् पुष्करपलाशवदिति ... नन्वत्र कारणलक्षणत्वहेतुसिद्धिरत आह कार्यकाः तथा च पुरुषः कर्तृत्वाभाववान्कारणत्वाभावादित्यनुमानं तत्र प्रमाणं बोध्यम् ननु तत्र कारणत्वसत्त्वादेव सिद्धिरत आह कार्यकाः नन्वेतादृशपुरुषसत्त्वे किं मानमत आह बुद्धिगतेति ... चैतन्यस्य बुद्धावारोपसंभवादिति भावः प्रकृतेरिति मूलप्रकृतेरित्यर्थः ननु पुरुषकर्तृत्वाभावे तत्र धर्माधर्मयोरप्यभावात्तदधीनसुखदुःखरणायोरिति तस्यादिति भावः ... तस्य पुरुषस्य
यो सत्त्वात्रानुत्पत्तौ ... दुःखध्वंसरूपो मोक्षः पुरुषस्य न स्यादत आह तस्संत्वासत्त्वाभ्यामिति बुद्धिसत्त्वासत्त्वाभ्यामित्यर्थः॥
बुद्धिसत्त्वे इंद्रियप्रणालिकया तत्परिणामेनायं घट इत्यादिज्ञानेन संबद्धो घटादिविषयः स्वाकारज्ञानपरिणामिबुद्ध्यग्रहीतासंसर्गकत्वसंबं

एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किंतु चेतनः कार्यकारणयोरभेदात्कार्यनाशे सति कार्यरूपतया तन्नाशो न स्यादि
त्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम् बुद्धिश्च प्रकृतेः परिणामः सैव महत्तत्त्वमंतःकरणमित्युच्यते
तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ तस्या एवेंद्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना संबंधः पुरुषे कर्तृत्वाभिमानो

धेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारसंपादकः बुद्धिनाशेन तत्परिणामस्यायं घट इत्यादिज्ञानरूपस्याभावाद्विषया
वच्छेदाभावात्केवलावस्थानं पुंसो मोक्षः दुःखसंबंध तद्ध्वंसौ संसारमोक्षौ न तु पुंसः किंतु बुद्धेरेवेति भावः ननु पुरुषे साक्षात्संबंधपर
वविषयस्यास्तु स एव च तस्मिन्संसारव्यवहारनियामकोऽस्तु किमुक्तबुद्धिघटितपरंपरासंबंधेनेत्यत आह तस्या एवेति तथा च विष
येबुद्धेरेव संबंधः पुरुषसंबंधः बुद्धिपुरुषयोरसंसर्गाग्रहात् न तु पुरुषे स्वातंत्र्येण विषयसंबंधोऽस्ति मानाभावात् न च विषयप्रका
शार्थं साक्षात्संबंध एवस्वीकार्यः किमुक्तपरंपरयेति वाच्यम् तस्य पुरुषस्य स्वभावनिबंधनत्वे पुरुषस्य नित्यत्वेन तत्स्वभावाधीनविषय राम ४५
संबंधस्य सर्वदा सत्त्वान्मोक्षाभावप्रसंगात् घटप्रकाशकाले पटादिरूपविषयस्वभावाधीनस्य पटादिरूपचैतन्यसंबंधस्य सत्त्वा
त्पटादेरपि प्रकाशापत्तेरिति यद्वा बुद्धितो ज्ञानस्य भेदमाह तस्या एवेति तथा च बुद्धेः परिणतिर्ज्ञानं न तु बुद्धिरेवेति भावः भेदाग्रहा
दिति बुद्धिपुरुषयोर्भेदाग्रहात्॥

20

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तवेवेदांतिनः निर्धर्मकं इति इदं च सत्यत्वाभावेपी त्यत्र हेतुतयोक्तम् ननु निर्धर्मकत्वे स्वाभिन्नधर्मशून्यत्वं मिथ्यात्वाभावे नूपसत्त्वं
स्वरूपस्वरूपत्वात् अभावस्याधिकरणात्मकत्वान्नानुपपन्नमित्यभिप्रायेणाशंकते मिथ्यात्वाभाव इति ननु कथमेकत्वाधि
करणे तदभावरूपं द्वित्वमत आह प्रत्येकमिति ननु ब्रह्म विद्ब्रह्मैव भवतीति श्रुतेर्मुक्तिदशायामभेद उपपन्न इत्यर्थिकायाः का
गतिरत आह यो पितदानीमिति अत एव ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः साम्यप्रतिपादकत्वादेव निरंजनः निर्दुःखः द्विती।
ये दोषमाह ईश्वरोपीति विज्ञानपदेन नित्यमित्यादिश्रुत्यंतर्गतविज्ञानपदेन अधिकरणत्वमुक्तं विज्ञानपदे न विज्ञानाश्र
यबोधनादिति भावः आनंदवदित्यर्थ इति भवदीयान्वयेनानंदशब्देनानंदवतो बोधनादन्यथानंदमिति नपुंसक

तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तदिति वदिद्वत्वाभावेपि द्व्यात्मकोना नित्यस्याविभुत्वतुल्यात् मि
थ्यात्वाभावो धिकरणात्मकत्वात् सत्यत्वमिति चेदेकत्वाभावो प्यकिं द्व्यात्मको द्वित्वमित्युच्यतां प्रत्येकमेकत्वेपि
पृथ्वीजलयोर्न तं घद्वित्वं द्व्यात्मकं तत्र नैकमित्यस्य सर्वजनसिद्धत्वात् यो पितदानीं प्रभेदप्रतिपादक आगमः सोपि निर्दुः
खत्वादिना साम्यं प्रतिपादयति संपदाधिकः पुरोहितो यं राजा संवृत्त इतिवत् अत एव निरंजनः परमं साम्यमुपैतीति
श्रूयते ईश्वरोपि न ज्ञानसुखात्मा किंतु ज्ञानाद्याश्रयः नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदे न ज्ञानाश्रयत्वबो
धः यः सर्वज्ञ इत्याद्यनुरोधात् आनंदमित्यस्याप्यानंदवदित्यर्थः आनंदो पि दुःखाभावे उपचर्यते भाराद्यपगमे सुखी
संवृत्तोहमितिवत् अन्यथा तस्मिन्नानंदो न वसावानंदः अमुखमिति श्रुतेः न वि प्रतेसुखमस्तीति कुतोनार्थ इति
चेन्न क्लिष्टकल्पनापत्तेः प्रकरणविरोधात् आनंदमित्यत्र मतबीयान्वयस्य विरोधाच्चेति संक्षेपः॥ रामायनमः॥

त्वानुपपत्तेरिति भावः न त्वानंदवदित्यर्थो न संगच्छते न व मन्ते ईश्वरे आनंदाभावादत आह आनंदो पीति लक्षणाकल्पनमेव तव
दोष इत्यत आह असत्त्वेति अमुखमिती ति असुखमित्यत्र नञ्प्रयोगात् सुखभेदबोधनादिति भावः क्लिष्टकल्पनापत्तेः बहुव्री
हावन्यपदार्थलाभार्थं नञः सत्त्वलक्षणापत्तेरित्यर्थः न च नञ्समुक्त्वे पि नञो लक्षणावश्यकी अन्यथा नञ्समासनाम धेत
याभेदेनान्वयासंभवादिति वाच्यम् तत्पुरुषे पि नियतत्वादिति ननु नञ्तत्पुरुषे पि तत्रासुखपदद्वयपदयोरेकधर्माविध
कत्वात् सामानाधिकरण्यमनुभवसिद्धमन्यथा नयोः समानवचनत्वानुपपत्तेरतस्तन्निर्वाहार्थं नञो भाववति लक्षणा
तवाप्यावश्यकीत्यत आह प्रकरणेति प्रकरणविरोधादिति आनंदं ब्रह्मणो विद्वान् वदिति मेतानंदमिति रूपस्य मतवीयान्वय

स्यार्थं विनानुपपत्तेरिति भावः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बुद्धेश्चेतनत्वसाधक...
हेतोरसिद्धिरित्यनेनोद्भावितामसिद्धिं बुद्धि
जन्याकर्तृत्वादित्यनुमानेनोद्धरति नन्विति ॥५

का० मु०टी० ५६

अन्यथेति कर्तृचेतनयोर्भेदांगीकार इत्यर्थः बुद्धेर्नित्यत्वं हि कर्तृभिन्नत्वेन तस्यांगीकारे तस्मिन्सुखदुःखाभावात्संसारमोक्षयोरनुपपत्त्या पूर्वोक्तरीत्या बुद्धिसत्त्वासत्त्वाभ्यामेव संसारापवर्गौ वाच्यौ तथा च बुद्धेर्नित्यत्वेन तत्सत्त्वनिबंधनस्य संसारस्य सर्वदापत्त्या मोक्षाभाव एव स्यात् बुद्धेरनित्यत्वे तु जन्यत्वं स्वीकरणीयम् जन्यस्य नाशाभावात् तथा च तदुत्पत्तेः पूर्वं तत्सत्त्वनिबंधनः संसारो न स्यादित्यर्थः वस्तुतस्तु तदुत्पत्तेः पूर्वं तदाश्रितादृष्टादेरभावाद्बुद्धेरनुत्पत्त्या संसारः कदापि न स्यादिति ध्येयम् असिद्धेरिति बुद्धौ प्रकृतिकार्यत्वाभावादिति ननु कर्तृत्वेन जन्यत्वानुमितिः परिशेषात्स्वकृतिजन्यत्वविषयिणी स्यादत आह कर्तुरिति

अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः ननु
अन्येन नाशः प्रकृतेः कार्यत्वाद्बुद्धेरन्येन तत्कार्यकारणयोस्ताद
त्म्यादिति चेन्न असिद्धेः कर्तुर्जन्यत्वे मानाभावात् वीतरागजन्माद
र्शनादनादित्वमनादेर्नाशासंभवान्नित्यत्वे किं तत्प्रकृत्यादिकल्पनेन

कर्तृत्वस्य जन्यत्वव्याप्यत्वेऽनुकूलतर्काभावादित्यर्थः प्रत्युत तद्विपरीतानादित्वग्राहकतर्कसद्भावादनादित्वमेव कर्तुरित्याह वीतरागेति वीतरागजन्मादर्शनादिति न्यायसूत्रं सरागजन्मदर्शनादिति तदर्थः अनादित्वमिति बालकस्य स्तनपानेष्टवृत्तेरिष्टसाधनताज्ञानमंतरेण तच्च नानुभवस्वरूपं बाधात् स्मरणस्य च समानाधिकरणपूर्वानुभवसापेक्षत्वात् पूर्वजन्मसत्त्वे पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्यैवं तत्पूर्वस्य जन्मनः सिद्धावनादित्वमात्मन इति भावः अनादेरित्यस्य भावस्येति शेषः जन्यभावत्वेन नाशहेतुत्वादिति भावः ॥ ॥ ॥

राम ५६

21

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इदानीं बुद्धितउपलब्धेर्भेदप्रदर्शनाय बुद्धेरंशत्रयं प्रदर्शयति ममेदमित्यादिना पुरुषोपरागः पुरुषसंबंधः दर्पणस्य यथा मुखसंबंधः प्रतिबिंबमात्रं न तु तात्विकस्तथा बुद्धिपुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपराग इत्यर्थः इंद्रियप्रणालिकया इंद्रियद्वारेत्यर्थः परिणतिभेदः अयं घट इत्यादिज्ञानरूपः परिणाम एव विषयेण घटादिना बुद्धेः संबंध इत्यर्थः तस्य पारमार्थिकत्वे निश्वासाभिहतदर्पणस्य मलिनिमा दृष्टांतः कर्तव्यमिनीति पूर्वोक्तपुरुषोपरागविषयोपरागाभ्यां कर्तव्यस्य घटादेरवभासस्तेन कर्तव्यमित्यध्यवसायो व्यापारावेश इत्यर्थः ज्ञानेन पुरुषस्य तात्विकः संबंध इत्यत्र ज्ञानेन पुरुषस्य योऽतात्विकः संबंधः स उपलब्धिरूपस्तत इत्यन्वयः अतात्विकत्वे दृष्टांतो दर्पणमलिनिम्नेव मुखस्य संबंध इति तथा च ज्ञानेन सह चेतनोऽहमिदं जानामीत्याकारो बुद्धावारोपितस्य संबंधोऽता

ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया न तु ततो विवादतात्विकः दर्पणस्येव मुखोपरागः इदमिति विषयोपरागः इंद्रियप्रणालिकया परिणतिभेदस्तात्विकः निश्वासाभिहतदर्पणस्येव मलिनिम्ना कर्तव्यमिति व्यापारावेशः तेनांशत्रयवती बुद्धिः। तत्परिणामेन ज्ञानेन पुरुषस्यातात्विकः संबंधः दर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः न च बुद्धिभिन्नेन तात्परिणामित्वादिति मत मर्यादस्तम् कृत्यदृष्टयो। गाणामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेर्जडभिन्ने मानाभावाच्च चेतनोऽहं करोमीति प्रतीतिः चेतनांशे भ्रम इति चेत्कृत्यं

त्विकः [illegible] सोपलब्धिर्न तु बुद्धेरेवोपलब्धिरिति भावः कृतिसामानाधिकरण्येनेति अदृष्टस्यानित्यत्वेऽपि धार्मिकोऽहं करोमीति ॥ तदंशे उपनीतभानरूपं तत्प्रत्यक्षं वो ध्यम् परिणामित्वादिति अनित्यधर्माश्रयत्वादित्यर्थः कृत्यदृष्टभोगानामिवेति कृतिः स्वसमानाधिकरण्येनैवादृष्टं जनयति तच्चादृष्टं स्वसमानाधिकरणमेव भोगं जनयतीति कृत्यदृष्टभोगानां परस्परसामानाधिकरण्यप्रमितिवच्चेतनोऽहं करोमीति सामानाधिकरण्यप्रतीतेरित्यर्थः तद्भिन्ने कर्तृभिन्ने मानाभावादित्यत्र चेतन इत्यादिः च पूर्वोक्तदूषणसमुच्चायकः कर्तृत्वाश्रयो न चेतनः जन्यधर्माश्रयत्वाद् घटवदिति बाधकसत्वाच्चेतनोऽहं करोमीति प्रतीतिश्चेतनांशे भ्रम इत्याशंकते चेतनोऽहमिति कृत्यंशेपीति बुद्धिः कर्तृत्वाभाववती जन्यधर्माश्रयत्वादिति बाधकस्य तत्रापि सत्वादिति भावः ॥ ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तदाश्रयत्वे धर्माधर्माश्रयत्वे अन्यथा विशेषगुणासंबंधाद् इत्यादि प्रतीतेरिति इत्यादौ ज्ञानादिसंबंधप्रकारेणैवात्मनः प्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः परकीयशरीरस्यादेरनींद्रियत्वेन हेतुत्वासंभवात् स्वरूपासिद्धेराह प्रवृत्तिरित्यादिरुक्ताश्रयत्वादिति शरीरस्य चैतन्यमिष्यते नोक्तत्वादित्यर्थः इत्यादीनामभावस्य कंठरवेणानुक्तेः प्राथम्यं चेष्टायाम्प्रवृत्तिज्ञापकत्वेऽनुकूलतर्कमाह चेष्टायाश्चेति चेष्टेति परशरीरे समवायेन चेष्टानुमितस्यात्वच्छेदकतया प्रयत्नस्य समवायेनाश्रयस्या

धर्माधर्मेति आत्मेत्यस्यानुषज्यते शरीरस्य तदाश्रयत्वे देहांतरकृतकर्मणां देहांतरे भोगानुपपत्तेः अध्यक्ष इति योग्यविशेषगुणसंबंधेनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जानेऽहं करोमीत्यादिप्रतीतेः केवलात्मविषयकप्रतीतेरननुभवादपरस्यात्मानुमीयते इत्याह प्रवृत्तीति आत्मा परदेहादौ प्रवृत्त्यादिनानुमीयते प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वाच्चेष्टया प्रयत्नवानात्मानुमीयते इति भावः अत्र दृ

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः प्रवृत्त्याद्यनुमेयोऽयं रथगत्ये
व सारथिः अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः विभुर्बुद्ध्यादिगुणवान्॥

ष्टांतमाह रथेति यथा रथे कर्मचेष्टाज्ञानवता यत्नवता चेतनेन कर्म अन्यथा सारथिर्यत्नवानुमीयते तथा चेष्टात्मकेन कर्मणा परात्मापीति भावः अहंकारस्येति अहंकारोऽहमिति प्रत्ययस्तस्याश्रयो विषय आत्मा न शरीरादीति मनइति मनोभिन्नेंद्रियजन्यप्रत्यक्षाविषयः मानसप्रत्यक्षविषय इत्यर्थः रूपाद्यभावेनेंद्रियांतरायोग्यत्वादिति विभुरिति विभुत्वं परममहत्परिमाणवत्वं तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तम् बुद्ध्यादीति बुद्धिः सुखदुःखेच्छादयश्चतुर्दशगुणा

स्तैवेति भावः दृष्टांतासिद्धिमाशंक्य निराकरोति यद्यपीति तथापीति तथा चहि न सांनिध्यस्य क्रियावत्त्वस्य वहेतुत्वमिति भावः आत्मनो मनोमात्रजन्यज्ञानविषयत्वे हेतुमाह रूपाद्यभावेनेति विभुत्वमिति कालस्वात्मदिशां सर्वगतत्वं परमं महदित्यनेनात्मनि परममहत्त्वस्योक्तत्वात् पौनरुक्त्यमाशंक्याह तच्चेति पूर्वमुक्तम् इति बुद्ध्यादिषट्कं संख्यादिपंचकं भावनात्वाधर्माधर्मौ गुणा एतेऽस्यात्मनः स्युश्चतुर्दशेत्यनेन साधर्म्यप्रकरणे कथितं इत्यर्थः ॥ इति श्रीमद्भारद्वाजकुलोद्भवबालकृष्णभट्टतनयमहादेवभट्टकृतौ मुक्तावलीप्रकाशे द्वितीयः परिच्छेदः समाप्तः ॥ ॐ नमो नारायणाय

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नचप्रकृतेरिति प्रकृतिर्मायातस्यागुणैः सत्वरजस्तमोलक्षणैः क्रियमाणानिकर्माणिभवंति अहंकारेणविमूढ
त्मयस्तेनविमूढआत्मांतःकरणंयस्यतथाविधःपुरुषःकर्ताहमितिमन्यतइत्यर्थकेनभगवद्वचनेनेत्यर्थः तेनात्म
नःकर्तृत्वाभावायादनादितिभावःअहमेवेति तथाचतेन स्वतंत्रकर्तृत्वाभावएवात्मनिप्रतिपाद्यते ननुकर्तृत्वस्या
मान्याभावइतिभावःप्रकटीकृतोयमिति अधिष्ठानंतथाकर्ताकरणंचपृथग्विधं विविधाश्चपृथक्चेष्टादैवंचै
[illegible]

नचप्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः अहंकारविमूढात्माकर्ताहमि
तिमन्यते इत्यनेनविरोधइतिवाच्यम् प्रकृतेरहंकारस्यगुणैरहमेवकर्तेत्यादिभिः क
र्ताहमेवेत्यस्यतदर्थत्वात् तत्रैवंसतिकर्तारमात्मानंकेवलंतुयइत्यादिवदताभग
वताप्रकटीकृतोयमुपनिषदादाशयइतिसंक्षेपः॥ ॥श्री॥ ॥श्री॥

वात्रपंचमम्इत्यनेनपंचानामपिकर्तृत्वंप्रतिपाद्यतत्रैवंसतीत्यादिना स्वतंत्रकर्तृत्वस्यैवात्मनोनिषिद्धत्वादिति
भावः एवंचपुरुषस्यैवकर्तृत्वमस्तु नचकारणत्वाभावेनकर्तृत्वाभावस्तत्रसाधनीयइतिवाच्यं स्वरूपासिद्धेःका
र्यकारणयोरभेदात्कार्यनाशेकार्यनूपतयानन्वाशःस्यादि स्वकारणत्वंपुरुषस्यस्वयिनसत् कार्यकारणयो
रभेदस्यैवासिद्धत्वादित्यादिविस्तरभयान्नोक्तमित्यभिप्रायवान्नाहसंक्षेपइति॥ ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible]

शेषयोर्विशेषणं हि विशेष्यतावच्छेदक ... विशिष्टवैशिष्ट्यावगाहि ... तिव्याप्तिरिति भावः ॥ ५८

...त्वं च परामर्शः तज्जन्यत्वं नाऽतो विशिष्टवैशिष्ट्यावगाहि चाक्षुषत्वं तन्नानुमितिलक्षणस्याति व्याप्तिरिति भावः

ईश्वरप्रत्यक्षस्य लक्षणत्वाभिप्रायेण अथवेति ज्ञानाकरणकमिति ज्ञानाजन्यमित्यर्थे व्याप्तिः विशिष्टज्ञानमात्रस्य विशेष

णज्ञानजन्यत्वादतो ज्ञानाकरणकमिति अनुमित्यादौ व्याप्त्यादिज्ञानस्य करणत्वमस्त्येवेति नानुमित्यादावतिव्याप्तिः अकरण

कत्वादीश्वरज्ञानसंग्रहः अथ निर्विकल्पकादौ योगिप्रत्यक्षलक्षणमिदमव्यापकमिति चेन्न ज्ञानाकर

णकपदेन ज्ञानत्वगर्भधर्मावच्छिन्नकरणताकत्वाभावस्य विवक्षितत्वात् न चैवं योगिप्रत्यक्षाव्यापकं श्रवणादि प्रतिपत्तीनां शाब्द

त्वादित्येवं जनकत्वेन विशिष्टाभावसत्त्वादिति अथवा ज्ञानकरणकत्वाव्यभिचारि जातिमत्त्वं ज्ञानत्वमिह विवक्षितं तादृशी च जा

तिरनुमितित्वादिरेवेति एतेनानुमित्यादौ व्याप्तिज्ञानादेर्ज्ञानविधया करणता न च ज्ञानत्वघटितकरणतावच्छेदकधर्माप्रसिद्धि

रसंभवोऽपि प्रत्युक्तः व्याप्तिज्ञानस्यैतद्विषयत्वं न च नष्टस्य करणत्वादित्यनेनान्वयः न च स्मरणात्मकपरामर्शस्थले व्याप्तिज्ञानस्य

करणतासंभव इति वाच्यम् तत्र व्याप्तिज्ञानस्य संस्कारद्वारा हेतुत्वात् न च ज्ञानपदस्य सविषयकपरत्वमेवास्तु किं व्याप्तिज्ञानस्य

संस्कार[illegible]द्वारा तत्र हेतुत्वकल्पनेनेति वाच्यं इच्छादितः संस्काराच्चानुमितेरनुदयात् सविषयकत्वस्यातिप्रसक्तत्वात् सादृश्य

अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षं अनुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्वानुभव

स्य करणत्वान्नातिव्याप्तिः इदमीश्वरप्रत्यक्षसाधारणम् परामर्शजन्यं ज्ञानमनुमितिः यद्यपि परामर्शप्रत्यक्षादिकं पराम

र्शजन्यं तथापि परामर्शजन्यो हेत्वविषयकं ज्ञानमनुमितिः न च कादाचित्कहेत्वविषयकानुमित्यव्याप्तिः तादृशज्ञान

स्यानुभवत्वव्याप्यजाति मत्त्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः एवं सादृश्यज्ञानकरणकं ज्ञान

मुपमितिः पदज्ञानकरणकं ज्ञानं शाब्दबोधः वच्छेदकसंबंधेहेतुता ५८

ज्ञानस्य सादृश्यप्रकारकज्ञानस्य तत्र अनुमित्यादेरनुमितित्वं लक्षयति परामर्शेति परामर्शत्वं च व्याप्तिविशिष्टपक्षधर्मताज्ञ

नत्वं तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति फलितम् भवति हि वह्निव्याप्यधूमवान् पर्वत इति ज्ञाने

व्याप्तिविशिष्टपक्षधर्मताज्ञानं ततश्च पर्वतो वह्निमानिति ज्ञानमिति तत्र लक्षणसमन्वयः यद्यपीत्यादि प्रत्यक्षादिकमित्यादिना

विशेषणतावच्छेदकप्रकारकनिश्चयविधया परामर्शजन्यस्य विशिष्टवैशिष्ट्यबोधस्य परिग्रहः परामर्शजन्यमिति विषयवि

धया तत्र परामर्शस्य हेतुत्वादिति भावः कादाचित्केति धूमवान् पर्वतो वह्निमानित्यनुमितौ पक्षतावच्छेदकविधया धूमस्य भानादि

तिभावः तादृशेति कथितनिश्चयजन्यहेत्वविषयके त्यर्थः सत्तामादाय तद्व्याप्तिरतोऽनुभवत्वव्याप्येति अनुभवत्वन्यूनवृत्तिमि

त्यर्थः तेन नानुभवत्वजातिमादाय प्रसंगः तादात्व्यप्रासिः जातिमत्वं च समवायेन विवक्षितम् तेन कालिकसंबंधेन जातिमति काले

नातिव्याप्तिः पक्षधर्मतायाः प्रवेशेन लाघवात् लक्षणान्तरमाह अथवेति अत्रापि साध्यतावच्छेदकधर्मसाध्यतावच्छेदकध

र्महेतुतावच्छेदकसंबंधानामननुगमादेकव्याप्त्युपादाने ऽन्यानुमितावव्याप्तेरेकां व्याप्तिमुपादाय तत्तज्ज्ञानकरणकत्वमनुभवत्वव्याप्

[illegible] लौकिकप्रत्यक्षे हि विषयस्य कारणत्वात्तत्र विषय[illegible]सप्परामर्शविषयकलौकिकानुव्यवसायात्मकेवनपा

...नुद्र्यसंयत लौकिकप्रत्यक्षेऽपि विषयस्य कारणत्वात् तत्र विषयस्य ... चेदत्राच्यते ... पक्षस्यैषापर्वतो वह्निमानिति निश्चयः ... परामर्शज्ञानपरामर्शात्मिके कालेव ... निरीयालकसिसाध्यविषा

...विषयाकर्षतस्य हेतुत्वमिति चेदत्रोच्यते ... लौकिकतया विशेषणविधया परामर्शजन्यत्वं तत्र संभवतीति भावः ॥ ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का० मु० टी० ५८

राम ५८ मे ५०

मूले बुद्धिस्तु द्विविधा मताऽनुभूतिः स्मृतिश्च स्यादिति तत्रानुभूतिः प्रमाणात्मकैवेति चार्वाकाः अनुमितिरपीति कणादसु
गतौ उपमितिरपीति केचन न्यायैकदेशिनः अर्थापत्तिरपीति प्राभाकराः अनुपलब्धिरपीति भाट्टवेदान्तिनः सम्भवैतिह्ये अपी
पीति पौराणिकाः तत्सर्वमयुक्तमिति सूचयितुमनुभूतेश्चातुर्विध्यमाह अनुभूतिश्चतुर्विधेति अनुमिनोमि उपमिनोमि श
ब्दयामीति प्रतीतिसिद्धानामनुमित्यादीनां दुर्वारत्वाच्चार्वाकोक्तमयुक्तम् अर्थापत्तेरनुमितावन्तर्भावो व्यतिरेकिग्रन्थे वक्ष्य
भविष्यति अनुपलब्धेस्त्वभाव एवान्तर्भावः अन्येषां च यथायथमनुमित्यादावन्तर्भाव इति भावः उद्देशसूत्रे मानस्य प्रथमो
पस्थितत्वात्प्रत्यक्षं लक्षयति मुक्तावल्यामिन्द्रियजन्यमिति ... इन्द्रियजन्यत्वमिन्द्रियत्वादावव्याप्तेर्ज्ञानमि
ति अनुमित्यादावतिव्याप्तिवारणायेन्द्रियजन्यमिति इन्द्रियजन्यत्वविशेषणेऽप्यनुमित्यादावतिव्याप्तिस्तदवस्थैवेत्याशंक
ते यद्यपीति तन्निविष्टेन्द्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्तिरतस्तदाह ईश्वरप्रत्यक्षं त्विति तथा च जन्यप्रत्यक्षस्यैव लक्षणमिति भावः

अत्रैव प्रसंगाद्बुद्धेः कतिपयं प्रपंचं दर्शयति बुद्धिस्तु द्विविधेति द्वैविध्यं प्रतिपादयति अनुभूतिरिति चतुर्विधेति तासां च
करणं करणमिव चत्वारि प्रमाणानि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि प्रत्यक्षमिति न

बुद्धिस्तु द्विविधा मता ॥ अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे

इन्द्रियजन्यं ज्ञानं प्रत्यक्षं यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्ष
मिति विवक्षितं ईश्वरप्रत्यक्षं तु न लक्ष्यम् इन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति सू

ननु तस्यैव लक्षणत्वे किं मानमत आह इन्द्रियार्थेति इन्द्रियार्थसन्निकर्षोत्पन्नमित्यनेनेश्वरज्ञानमनुमित्यादिश्च व्यावर्त्यते भ्रमवा
४२ रणायाह अव्यभिचारीति भ्रमभिन्नमित्यर्थः एतावता प्रत्यक्षप्रमाया लक्षणमुक्तम् तद्विभागमाह अव्यपदेश्यमिति निर्विक
ल्पकमित्यर्थः न चाव्यपदेश्यपदेन कथं निर्विकल्पकलाभ इति वाच्यम् व्यपदेश्यं पदं वाच्यत्वं तद्विषयकमित्यस्याद्विशिष्टज्ञा
नेत्यन्ते तद्वाच्यत्वमुपनीतं भासत इति प्राचीनमतानुसारित्वात् अत एव कणादं कणादनामानं मुनिमित्यादि तत्र तत्रोक्तं संगच्छते
यद्वा अपदेशः शब्दप्रयोगः स च विशिष्टज्ञानादेव तस्याव्यपदेश्यत्वेनापदेशानर्हत्वेन निर्विकल्पकलाभः व्यवसायात्मकमिति
विशिष्टव्यवसायात्मकमित्यर्थः विशिष्टज्ञानात्मकमित्यावत् एवं च सूत्रे इन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचार्यपदेश्यं
व्यवसायात्मकमिति योजना वा अन्यथा लक्षणवाक्ये विभागबोधकपदेन व्यवधानादसंगतमिति तथैवोक्तत्वादिति ईश्व
रप्रत्यक्षं तु लक्ष्यत्वस्यैवाभिप्रेतत्वादित्यर्थः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न्यूनतां परिहर्तुमाह वृत्यक्तादिकमपीति आलोकसंयोग इति एतस्य च कारणत्वमंधकारे चाक्षुषापत्तिवारणाय उद्भूतरू
पस्य तु पिशाचादीनां प्रत्यक्षत्ववारणायेत्यवधेयम् तयोः उद्भूतरूपालोकसंयोगयोः रूपभिन्नस्य रूपत्वादेस्त्वगिंद्रियेणाग्रहणा

आलोको ...तरूप = रूप =

योगेति वृत्यक्तादिकमपि योग्यवृत्तिबोध्यम् तादृशो योग्यव्यक्तिवृत्तिः चक्षुर्योग्यत्वमेव कथं तदाह गृह्णातीति।
कौ० आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणं न वद्रव्यचाक्षुषे इति तयोः समवायसंबंधेन कारणत्वम् उ
मु०दी० द्रव्य- द्बसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवा
४९ यसंबंधेनेति उद्भूतस्पर्शवदिति उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः सोपि उद्भूतस्पर्शोपि स्पर्शत्वादिसहितः रूपान्यदिति

क्रियाजातिर्योग्यवृत्तिः समवायश्च तादृशः गृह्णाति चक्षुःसंबंधादालोकोद्भूतरूपयोः उद्भूतस्प
र्शवद्द्रव्यं गोचरः सोपि च त्वचः रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् द्रव्याध्यक्षे॥ श्री ॥

रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं तत्त्वगिंद्रियस्यापि योग्यम् तथा च पृथक्त्वसंख्यादयोपि चक्षुर्ग्राह्या गु
णा उक्ताः एवं क्रियाजातयो योग्यवृत्तयश्च त्वचो ग्राह्या इति रूपमत्रापि कारणं द्रव्याध्यक्षे इति अत्रापि त्वगिंद्रियजन्ये
पि द्रव्यप्रत्यक्षे रूपं कारणम् तथा च बहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्॥ ॥ ॥

ग्राह रूपत्वादिभिन्नमिति आदिना नीलत्वादीनां परिग्रहः द्रव्याध्यक्ष इति पूर्वान्वयि न तूत्तरान्वयीति बोधयितुं रूप राम ४९
मत्रापि कारणं द्रव्याध्यक्ष इत्यंतं प्रतीकं धारणम्॥ ॥ ॥श्री॥

२५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु अनुमितिं प्रत्यपि व्याप्तिज्ञानत्वेन न कारणत्वं किंतु ज्ञानत्वेन मनस्त्वेनैव वा एवमुपमित्यादावपि मनस्त्वेनैव करणत्वं न च कार्य-
वैजात्यं न स्यादिति वाच्यं सामग्रीवैलक्षण्यादेव तदुपपत्तेः न च प्रमाणविभागानुपपत्तिः क्रियाविशेषात्तदुपपत्तेरतः पूर्वोक्तानुमित्या-
दिलक्षणानामसंभव इत्यत आह वस्तुत इति घटेऽतिव्याप्तिवारणाय वृत्तित्वान्तम् वृत्तित्वं समवायेन विवक्षितम् तेनानुमितौ का-
लिके न घटत्वस्य वृत्तित्वेऽपि नातिव्याप्तिः ज्ञानत्वानुभवत्वमादाय प्रत्यक्षादावतिव्याप्तिवारणाय विशेष्यदलं ननु मनसः करणता-
पक्षे ज्ञानाकरणकत्वं प्रत्यक्षलक्षणमनुमित्यादावतिव्याप्तमतः प्रत्यक्षस्य लक्षणान्तरमाह एवमिति प्रत्यक्षत्वादिकमिति य-

त्वत्तो यत्किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वमनुमितित्वम् एवं यत्किंचित्प्रत्यक्षादिकव्यक्ति-
मादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति संक्षेपः जन्यप्रत्यक्षं विभजते घ्राणजादीति घ्रा-
णजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षं न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वं जन्यप्रत्यक्षस्यैव निरूपणी-

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् घ्राणस्य गोचरो गंधो गंधत्वादिरपि स्मृतः तथा रसो रसज्ञायास्तथा शब्दोऽपि च
श्रुतेः उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वस्नेहो द्रवत्वं परिमाणयुक्तम्

यत्वात् उक्तसूत्रानुसारात् गोचर इति व्याप्यस्यार्थः गंधत्वादिरित्यादिपदात्सुरभित्वादिपरिग्रहः गंधस्य प्रत्यक्षत्वात् तद्वृत्तिजा-
पुष्पा २ तिरपि प्रत्यक्षा गंधग्रहणे घ्राणस्य सामर्थ्यमिति बोध्यम् तथा रस इति रसत्वादिसहित इत्यर्थः तथा शब्दत्वादिसहि- का २
तः रसो गंधश्चोद्भूतो बोध्यः उद्भूतरूपमिति निरीक्षणादावनुद्भूतरूपमिति न तत्प्रत्यक्षम् तद्वतीति उद्भूतरूपवतीत्यर्थः ॥ श्री ॥

किंचिदुपमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वमुपमितित्वम् यत्किंचिच्छाब्दबोधव्यक्तिमादाय तद्व्यक्ति-
वृत्तिप्रत्यक्षासमवेतजातिमत्त्वं शाब्दबोधत्वमित्यर्थः शाब्दभेदेनानुमित्यादीनां लक्षणकल्पनमनुभवत्वजात्यंगीकारेण
तदनंगीकारे तु तद्व्यक्तिसमवेतस्य प्रत्यक्षासमवेतजातिधर्मस्य समवायित्वरूपसलक्षणं चतुष्टयस्यैकशब्देन वक्तुं शक्यत्वादिति
ध्येयम् उक्तसूत्रेति इंद्रियार्थसन्निकर्षोत्पन्नमित्यादिप्रदर्शितसूत्रानुसारादित्यर्थः घ्राणस्य निर्विषयत्वादाह गंधस्येति ।
सुरभित्वादीत्यादिना सुरभित्वपरिग्रहः तद्वतीति गंधवतीत्यर्थः उद्भूतपदस्य कृत्यमाह गंधोत्केति उष्मादाविति आदिना चक्षु-
रादिग्रहणे तत्परिग्रहः तत्र तत्त्वम् नोष्मादिगतरूपं प्रत्यक्षमित्यर्थः ॥

ष्मतः समवायिकारणता ... पर्यायित्वात् सिद्धसाकार-
त्वरूपमत्यक्षादावं तद्भूतत्वात् अनुभवत्वजात्यनंगीकारपक्ष इति ॥ ४८ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का० मु० दी० ५०

प्रकृते च पूर्वोक्तलाघवतर्कस्य सत्त्वेन तदभावविशिष्टव्यभिचारसंदेहाभावस्य सत्त्वात् यथोक्तप्रमायाम् इत्यत एव विशेषपत्तिरित्येवं किं न स्यादित्यत आह । अत्र प्रमायामपि विशेषविहङ्गमाद्यपेक्षया अविशेषविहङ्गमाद्यस्य परिदृष्टत्वात् इत्यत आह ज्ञानसामान्ये जन्यज्ञानसामान्ये ज्ञानाजनकत्वमिति प्रमाणाभिन्नत्वं नुपपद्यते चक्षुरादेर्नेत्यादिना त्वगादिपरिग्रहः तदभावादेव चक्षुरादिना मनोयोगाभावादेव ज्ञानादेरभावादेव नत्वादिना मानसमित्यन्वयः अभावादित्यत्रापि ज्ञानादेरित्यस्यान्वयो बोध्यः तत्प्रत्यक्षमिति नियोगपयुगपत्सेवं धेनेवात्मनः प्रत्यक्षस्वीकारात्

त्वचो योग इति त्वङ्मनोयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणम् सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवनूपं स्मरणरूपं वा नाद्यः अनुभवसामग्र्यभावात् तथाहि प्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं ज्ञानादेरभावादेव न मानसं ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षम् व्याप्तिज्ञानाभावादेव नानुमितिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावादेव न शाब्दबोधः इत्यनुभवसामग्र्यभावान्नानुभवः उद्बोधकाभावाच्च न स्मरणम् मैवं सुषुप्तिप्राक्काले

त्वचो योगो मनसा ज्ञानकारणम्

त्यन्वेत्यादिग्रन्थे स्वत्त्वसंबंधेनात्मनः प्रत्यक्षत्वप्रसंगात् न दर्शीन्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायते इत्यत्रापि मानाभावात् अपक्षानमात्रे यदि त्वङ्मनःसंयोगस्य कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले चाक्षुषप्रत्यक्षं स्यात् विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् परस्परप्रतिबन्धादेः कल्पने न स्यादित्यत आह केचित् पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रति

योग्यविशेषगुणप्रत्यक्षसामग्र्यन्तरतेरतग्रस्य ज्ञानादेरभावादेव नात्मप्रत्यक्षमित्यर्थः उद्बोधकाभावादिति उद्बोधकस्य फलबलकल्प्यत्वादिति भावः इच्छादिग्रन्थे इति इच्छाया आदिरितिबुध्यस्याज्ञानमात्रे विवक्षितम् न दर्शीन्द्रियत्वे ज्ञानानीन्द्रियत्वेन नु सुषुप्तिप्राक्कालीनज्ञानस्य निर्विकल्पकरूपत्वात् न दर्शीन्द्रियत्वसंभवादिसिद्धमेवेत्यत आह सुषुप्तिप्राक्कालेति त्वङ्मनःसंयोगस्य चेति तदस्वीकारे चाक्षुषमपि न स्यादिति भावः ननु चाक्षुषादिसामग्र्याः स्पार्शनं प्रति प्रतिबन्धकत्वादेव न स्पार्शनं तत्रेत्यत आह परस्परेति अनुभवानुरोधादिति अनुभवस्यैव याथार्थ्यत्वादिति ननु त्वदभ्यासादिप्रत्याहारादिना त्वङ्

[illegible] संगतलाभात् दिभावः॥

राम ५०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शंकते वहिरिंद्रियेति ननु कार्याभावे कारणाभावस्य प्रयोजकतया गगनादौ वहिरिंद्रियजन्यप्रत्यक्षाभावे रूपाभावस्पर्शाभाव
योः प्रयोजकत्वकल्पने गौरवात् तादृशप्रत्यक्षे रूपत्वेन हेतुतां कल्पयित्वा तदवच्छिन्नाभावत्वेन तादृशाभावे प्रयोजकत्वमुचितमि
त्यत आह आत्मावृत्तीति आत्मनो वहिरिंद्रियजन्यप्रत्यक्षत्ववारणाय आत्मावृत्तीति आकाशस्य वहिरिंद्रियजन्यप्रत्यक्षत्ववार
णाय शब्दभिन्नेति कालादेस्तद्वारणाय विशेषेति शंकते रूपस्येति पुनः शंकते इहेति प्रतिबंधो न रयत्ति उद्भूतेति उपसंहर
ति तस्मादिति ननु त्वचः स्पर्शाद्यनंगीकारात् स्पार्शनवारणाय स्पर्शान्यद्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पार्शनवत्
समवायत्वेन हेतुत्वस्य वाच्यतया वायोः स्पार्शनांगीकारे नोचितः अन्यथा वायुगतसंख्यापरिमाणयोस्त्वचा ग्रहणप्रसंगादिस

नत्वास्तु वहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपेण कारणं प्रमाणाभावात् किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः का
रणमन्वयव्यतिरेकात् वहिरिंद्रियजन्यद्रव्यमात्रप्रत्यक्षे किं कारणमिति चेन्न किंचित् आत्मावृत्तिशब्दभिन्नविशेष
गुणवत्त्वं वा प्रयोजकमस्तु रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिंद्रियेण ग्रहणप्रसंगात् इष्टापत्तिरिति चेन्न
उद्भूतस्पर्शत्वेन लाघवात् कारणमस्तु प्रभायाः प्रत्यक्षत्वे त्विष्टापत्तिरिति किं न स्यात् तस्मात् प्रभां पश्यामीतिवद्वायुं स्पृ
शामीति प्रत्ययस्य संभवात् द्वयोरपि प्रत्यक्षत्वं भवत्येव वहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुता वायुप्रभयोरेकत्वं
गृह्यते एवं च कचिद्द्वित्वादिकमपि कचित्संख्यापरिमाणग्रहोदोषादित्याहुः ॥ ॥श्री॥ ॥श्री

तत्राह वायुप्रभयोरिति प्रभोपादानं दृष्टांतार्थं ग्रहणं त एवेति तथा च वायुगतसंख्यादिग्रहे इष्टापत्त्या वायोः स्पर्शनांगीका
रे बाधकाभाव इति भावः कचिदिति सजातीयसंवलनाभाव इत्यर्थः आदिपदात् परिमाणपरिग्रहः ननु हस्तभूयोवयवाव
च्छेदेन त्वगिंद्रियसन्निकर्षस्थले बोध्यः ननु सजातीयसंवलनदशायां भूयोवयवावच्छेदेन त्वगिंद्रियसन्निकर्षाभावे च
कथं न वायुगतद्वित्वपरिमाणयोः ग्रह इत्यत आह कचित्संख्यापरिमाणे तिरोधानादिति सजातीयसंवलनादिरूपाद्दोषाद
दित्यर्थः आतुरागमस्वरसोद्भावनम् तद्वीजं तु वायोः प्रत्यक्षतासंदेहे न लाघवान्मूर्तप्रत्यक्षत्वावच्छिन्नं प्रति रूपत्वेनैव का
रणत्वमुचितम् न च वायुप्रत्यक्षतासंदेहाधीनव्यभिचारसंदेहस्य प्रतिबंधकस्य सत्त्वात् कथं कारणत्वग्रह इति वाच्यम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आत्मादिवारणायेति आत्मादौ योग्यतापत्तिरूपो दोषस्तद्वारणायेत्यर्थः तत्त्वं तदीन्द्रियत्वाद्यादितरेयेविशेषगुणाः सुखादयस्तद
आश्रयत्वस्य चात्मनि सत्त्वान्नातिव्याप्तिरिति भावः आत्मन्यपि सत्त्वादिति तथा चात्राव्याप्तिरिति भावः विशेषणदलस्य प्रयोजनं वक्तुं
अयत्वस्य चात्मनि सत्त्वान्नातिव्याप्तिरिति जनकत्वानुपपत्तेरिति एकैकस्य कार्यतावच्छेदकत्वमितिचेन्न कर्णशष्कुल्यवच्छिन्नत्वेनैव कारणत्वस्य
मिकामाह उद्भूतत्वमिति जनकत्वानुपपत्तेरिति एकैकस्य कार्यतावच्छेदकत्वमितिभावः इन्द्रियाव
तानवच्छेदकत्वादिति भावः तदभावकूटवत्त्वाद्भूतत्वमिति [illegible] कर्णशष्कुलस्य कारणतावच्छेदकत्वमितिभावः इन्द्रियाव
यववारणायेति मनःप्रभृतिष्वतिव्याप्तिवारणम् नवीनमते [illegible] प्रयोजनमाह कालादाविति समवायेन घटाद्यभावादौ

इन्द्रियमिति अत्रापि षड्विधमित्यनुषज्यते इन्द्रियत्वं तु न जातिः पृथिवीत्वादिना संकरात् किंतु शब्देतरोद्भूतविशेषगुणा
नाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वं आत्मादिवारणाय सत्यन्तम् उद्भूतविशेषगुणस्पर्शोऽपि सु२
सत्त्वात् शब्देतरेति विशेषगुणं स्पर्शादिस्पर्शत्वगादावपि सत्त्वात् उद्भूतेति उद्भूतत्वं जातिः रूपत्वादिना संकरात् न
च रूपत्वादिव्याप्यनानैवोद्भूतत्वमिति वाच्यम् उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः किंतु रूपत्वादि
व्यापकानेकानुद्भूतत्वम् तदभावकूटश्चोद्भूतत्वं न च संयोगादावव्याप्तिः तथा च शब्देतरोद्भूतगुणाः संयोगादेश्चक्षुरादा

इन्द्रियं करणं मतं विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः द्रव्यग्रहस्तु संयोगात्संयु
क्तसमवायतः द्रव्येषु समवेतानां तथा तत्समवायतः तत्रापि समवेतानां शब्दस्य [illegible] ॥

द्रव्यत्वाश्रयतो विशेषेति कालादि वारणाय विशेषदलं इन्द्रियावयववारणाय विषयसंबन्धः स विषयांशतेजन्यत्वजनकत्वात्
दिन्द्रियावयववारणाय मनःपदे नवीनमते कालादौ रूपाभाव प्रत्यक्षे सन्निकर्षादिद्वारकतया कारणीभूतचक्षुःसंयो
गाश्रयस्य कालादेर्वारणायवा मनःपदं ज्ञानकारणमित्यपि तद्वारणाय करणमिति असाधारणं कारणं करणम्॥
असाधारणत्वं व्यापारवत्त्वं व्यापारः सन्निकर्षः षड्विधसन्निकर्षमुदाहरति द्रव्यग्रह इति द्रव्यप्रत्यक्षमिन्द्रियसंयो
गजन्यं द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यं एवमग्रेऽपि ॥ ॥श्री॥

26

कालसंबंधितत्तत्त्वम् योग्यानुपलब्धेरभावादेरनुपाभाववर्णनानुधावनम् तद्वारणायेति कालादेर्वारणायेत्यर्थः ज
न्यत्वघटितं समवायस्तु सम्बन्धेन शब्दसंबंधे समवायरूपेऽभावाद्याह व्यापारः सन्निकर्ष इति द्रव्यप्रत्यक्षमिति द्रव्यवृत्ति
लौकिकविषयतासंबंधेन प्रत्यक्षमित्यर्थः द्रव्यसमवेतेति द्रव्यसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षमित्य
एवमग्रेऽपीति द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षं इन्द्रियसंयुक्तसमवेतसमवायजन्यमित्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का० मु० दी० ५२

रम ५२

निर्विकल्पकस्य विशेषणतावच्छेदकप्रकारकत्वेऽपि विषयाहेतुत्वात् ... इति पाद ...

शंकते वहिरिति ... ननु ... [illegible]

... विशेषतावच्छेद ... स्येव निर्विकल्पं नाम निर्विकल्पकस्वरूपम् लक्षणं तु प्रकारताशून्यत्वादिकं प्रत्येकम्

... यम् निर्विकल्पके मूलोक्तमतीन्द्रियत्वं साधयति न पाहीत्यादिना ज्ञान ... विषयानवगाहि न भवतीत्यन्वयः

इति प्रत्ययादिति ... घटाद्यवगाहित्वेनैव ज्ञानप्रत्यक्षं ... अनुभवसिद्धत्वादित्यर्थः तत्र घटमहं जानामीति प्रत्यये घट

त्वादिविशिष्टवैशिष्ट्यभानं ज्ञानेन संभवतीति न च विशेष्यविशेषणभावमितिरीत्यैव निर्विकल्पकानुव्यवसायोऽस्ति

वैशिष्ट्यानवगाहीति तु समुच्चयः ॥ २ ॥

तदेव निर्विकल्पकं न च निर्विकल्पाख्यं न प्रत्यक्षम् तथाहि विषयानवगाहि ज्ञानस्य प्रत्यक्षं न भवति घ

टमहं जानामीति प्रत्ययात् तत्रात्मनि घटज्ञाने प्रकारीभूय भासते ज्ञाने घट ... घटत्वं प्रकारोऽयः सविशे

षणमित्युच्यते विशेषणे यद्विशेषणं तेन द्विशेषणतावच्छेदकमित्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञा

नं विशिष्टवैशिष्ट्यज्ञाने कारणम् निर्विकल्पके च घटत्वादिकं न प्रकारः ... त्वादिविशिष्ट घटादिवैशि

महत्त्वं षड्विधे हेतुः

ष्ट्यभानं ज्ञानेन संभवति घटत्वाद्यप्रकारकं घटत्वादिविशिष्टज्ञानं न संभवति ज्ञानस्य सविकल्पपदार्थज्ञानस्य

किंचिद्धर्मप्रकारकत्वनियमात् महत्त्वमिति द्रव्यप्रत्यक्षे महत्त्वं समवायेन हेतुः द्रव्यसमवेतानां गुणकर्म

सामान्यानां प्रत्यक्षे स्वाश्रयसमवायेन द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतस

निवायम् ... घटो घटोऽयमिति ... महत्त्वं नानेतरस्य घटं जानामीति प्रतीत्यायत्वाद्विशिष्टवैशिष्ट्य विषयता

... स्यानुव्यवसायानभ्युपगमादिति महत्त्वं षड्विध इति घटादिश्रावणे ... महत्त्वस्य हेतुत्वे प्रयोजनाभावस्तथा

पि द्रव्यसमवेत प्रत्यक्षत्वादेस्तज्जन्यतावच्छेदकस्य श्रावणादिसाधारण्यात् श्रावणान्यत्वनिवेशनगौरवा

त्प्रयोजनाभावाच्च षड्विध इत्युक्तमिति ध्येयम् ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्पार्शनप्रत्यक्षे त्वक्संनिकर्षस्य कारणत्वं प्रपंचयति एवमित्यादिना पूर्ववदेवेति परमाणुघटितत्वे संनिकर्षेणास्य यः
र्शत्वस्पार्शनवारणाय महत्त्वावच्छिन्नत्वं प्रमाघटितसंनिकर्षात्सत्तादिस्पार्शनवारणायोद्भूतस्पर्शावच्छिन्नत्वादि विशेष
णं बोध्यमित्यर्थः श्रोत्रावच्छिन्नेति सकलयुक्ताणां सर्वशब्दप्रत्यक्षापत्तिरतः श्रोत्रावच्छिन्नेति इंद्रियसंबद्धेति यद्य

का० मुक्ती० ५३ एवं द्रव्यस्पार्शने त्वक्संयोगः कारणम् द्रव्यसमवेतस्पार्शने त्वक्संयुक्तसमवायः द्रव्यसमवेतसमवेतस्पार्शने
त्वक्संयुक्तसमवेतसमवायः अत्रापि महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं पूर्ववदेव बोध्यम् एवं गंधप्रत्यक्षे
घ्राणसंयुक्तसमवायः गंधसमवेतप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः रसप्रत्यक्षे रसनसंयुक्तसमवायः र
ससमवेतरासने रसनसंयुक्तसमवेतसमवायः शब्दस्येति शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः तद्वृत्तीति श

शब्दस्य समवायत्वात् तद्वृत्तीनां समवेतसमवायेन तद्ग्रहः प्रत्यक्षं सम
वायस्य विशेषणतया भवेत् विशेषणतया तद्भावानां ग्रहो भवेत्॥

ब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः अत्र सर्वत्र प्रत्यक्षत्वं लौकिकं बोध्यम् तस्मात् अलौ
किकमिंद्रियसंयोगादिकं विनापि भवति एवमात्मप्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसे मनःसंयुक्तसमवा
यः आत्मसमवेतसमवेतमानसे मनःसंयुक्तसमवेतसमवायः कारणम् समवायस्येति अभावानामिति॥
21 समवायप्रत्यक्षे अभावप्रत्यक्षे चेंद्रियसंबद्धविशेषणता हेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः॥ ॥ ॥

पींद्रियसंयुक्तविशेषणताइंद्रियसंयुक्तसमवेतविशेषणतेत्यादिक्रमेणावक्तव्यमेव तथापि विशेषणतात्वेनैकरूपेणैवा
गः नत्वेवं समवायत्वेन तत्तु तस्मिन्ननुगमप्रसंगः यदिना बाधान्मयर्थनुयोगसत्वात् समवायो न प्रत्यक्षः इति संबंधप्रत्यक्षे या राम ५३
वदाश्रयप्रत्यक्षस्य हेतुत्वादिति भावः॥ ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उद्भूतरूपावच्छिन्नेति महत्वावच्छिन्नेति [illegible] कदर्थ [illegible]

ननु द्रव्यप्रत्यक्षे इन्द्रियसन्निकर्षत्वेन हेतुत्वे त्वक्प्रभासंयोगाच्चाक्षुषापत्तिः [illegible] कारेणच [illegible] प्रति [illegible]मनः
त चक्षुरत्स्त्विति ननु एवमात्मप्रत्यक्षानुरोधेन मनःसंयोगस्य ज्ञानादिप्रत्यक्षानुरोधेन मनःसंयुक्त [illegible]
रूपादिसंयोगतत्संयुक्तसमवाययोः प्रमाणाभावः चक्षुरादिसंयुक्तसमवेतसमवाये नैव अणुकादिग्राहकत्व [illegible]
ति परंपरया स्वाश्रयसमवेतत्वादिसंबंधेन उद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुःसंयुक्तसमवाय [illegible]
चक्षुःसान्निकर्षाच्छुक्लत्वादीनां प्रत्यक्षवारणायोद्भूतेति नचाच महत्वावच्छिन्नचक्षुःसंयुक्तसमवेत [illegible] त्रसरेणु

वच्छिन्नत्वद्रव्यचाक्षुषं प्रतिचक्षुःसंयोगः कारणं द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः द्रव्यसम[illegible]तसमवेतचा
क्षुषं प्रतिचक्षुःसंयुक्तसमवेतसमवायः एवमन्यत्रापि विशिष्यैव कार्यकारणभावः परंतु पृथिवी परमाणुनीलेन नी
लत्वे पृथिवीपरमाण्वादौ च पृथिवीत्वं चाक्षुषाकर्षणं गृह्यते तत्र परंपरयोद्भूतरूपसमहत्त्वस्य सत्वात् नचापि
नीलत्वजातिरेकैव घटनीले परमाणुनीले च वर्तते तथा च महत्संवेधो घटनीलमादाय वर्तते रूपसंवेधः परमाणु
मादायैव वर्तते एवं पृथिवीत्वेपि घटमादाय महत्वसंवेधो बोध्यः एवं वायौ नदीयस्पर्शादौ च सत्तादि चाक्षुषसा
त तस्मादुद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषे नाहशक्यं चक्षुःसंयुक्तसमवेत
समवायस्य द्रव्यसमवेतसमवेतचाक्षुषकारणत्वं वाच्यम् इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः परमा
णौ चक्षुःसंयोगस्य महत्वावच्छिन्नत्वाभावात् एवं वाय्वादौ न सत्तादिचाक्षुषम् तत्र चक्षुःसंयोगस्योद्भूतरूपा
वच्छिन्नत्वाभावात् एवं यत्र घटस्य एतावच्छेदेनालोकसंयोगश्चक्षुःसंयोगस्य तदवच्छेदेन तत्र घटप्रत्यक्षा
भावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम् ॥ ॥श्री॥

कभावं सत्त्वाच्चाक्षुषापत्तिरतः चक्षुरादिसंयोगस्य प्रत्यक्षसन्निकर्षमात्रस्य पक्षमिति भावः संयुक्तसमवेतसमवायेन सं
युक्तसमवायस्यान्यथासिद्धिमाह द्रव्यसमवेतेति नाहशेति महत्वावच्छिन्नेत्यर्थः तथा च महत्वावच्छिन्नचक्षुः
संयुक्तसमवेतसमवायस्य त्रसरेणुरूपेऽभावात् न चाक्षुषानुपपत्त्या संयुक्तसमवायस्य प्रत्यासत्तित्वमावश्यकमि
ति भावः एतत्प्रसंगेन पूर्वं [illegible]वच्छिन्नत्व[illegible]चालोकसंयोगावच्छिन्नत्वं च चक्षुःसंयोगे तस्योजनं [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का० मु० टी० ५६

आसत्तिं ... राश्रयाणांतु इत्यादिमूलमवतारयितुंभूमिकामारचयति यदंत्वित्यादिना भूतलेघटस्यज्ञानदृष्येनान्वयः भूतलादीनामित्यादिनासंयोगेनतद्घटाधिकरणद्रव्यांतरपरिग्रहः तत्रेदंबोध्यमिति ज्ञायमानमनिसत्सामान्येन तत्रप्रत्यासत्तिरितिबोध्यमित्यर्थः यदंपरस्याप्रत्यासन्नस्यघटत्वादेरेवप्रत्यासत्तित्वसंभवात्किंत्वित्यादिनावक्ष्यमाणदोषासंगतेराह यदंत्विति नचात्र घटत्वस्य परंपराकपालादावज्ञानाद्वक्ष्यमाणदोषसंगतिः तेनसंबंधेनेति अन्यथा समवायेनज्ञानप्रकारीभूतघटत्वादिसामान्यप्रत्याकालादिज्ञानापत्तेरितिभावः किंत्वितिएवंचेत्यर्थः किंचेतिकुतो सत्या २ नजन्यतइति इदमापाततः सामान्यलक्षणाघटकीभूतलौकिकसन्निकर्षस्यविशेषणत्वविवक्षणेनकालांतरीयघटे

यदंतुसामानानांभावः सामान्यंतद्ध्युक्तंचिन्नित्यंधूमत्वादि क्वचिच्चानित्यं घटादियत्रैकोघटः संयोगेनभूतलेसम वायेनकपालेवांज्ञातस्तदनंतरंसर्वेषामेवतद्घटवतांभूतलादीनांकपालानांचज्ञानंभवति तत्रेदंबोध्यम् यदंतु सामान्ययेनसंबंधेनज्ञायते तेनसंबंधेनाधिकरणानांप्रत्यासत्तिः किंतुयत्रतद्घटनाशानंतरंतद्घटवतांस्मरणं जातेतत्रसामान्यलक्षणयासर्वेषांतद्घटवतांभानंनस्यात् सामान्यस्यतदानीमभावात् किंचेंद्रियसंबद्धविशेष्यकंघटइतिज्ञानं यत्रजातंतत्रपरदिनइंद्रियसंबंधविनापितादृशज्ञानप्रकारीभूतसामान्यस्यसत्वात्तादृशज्ञानं कुतोनजन्यतेतस्मात्सामान्यज्ञानंप्रत्यासत्तिर्नतुसामान्यमित्याह ॥श्री॥ ॥श्री॥ ॥श्री

गमादावोक्तातिप्रसंगस्याभावात् इति तस्मात्पूर्वोक्तदोषएवात्रकल्पेबोध्यः नचतत्रस्वसमवायिसमवायादिसंबंधे नघटत्वादेरेवासत्तितया पूर्वदोषोपिनसंभवतीतिवाच्यम् स्वसमवायिसमवायादिनाघटत्वेकपालादीयदानज्ञातं किंतुतद्घटएवसमवायादिनाज्ञातस्तदुत्तरमपितद्घटाश्रयकपालादीनांज्ञानस्यसर्वानुभवसिद्धस्यघटत्वप्रत्यासत्त्या पपादयितुमसंभवात् एवंज्ञायमानसामान्यस्यप्रत्यासत्तित्वेचैत्रीयज्ञानविषयसामान्यप्रत्यासत्त्यामैत्रस्यतदाश्रयप्र त्यक्षापत्तिभियातत्पुरुषीयत्वनिवेशस्यावश्यकतयागौरवमतज्ञानस्यप्रत्यासत्तित्वेतुपुरुषनिष्ठप्रत्यासत्त्याहेतुत्वान्न

राम ५६

२८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तच्चसामान्यस्वरूपंच अत्रयदीति इंद्रियसंबद्धं सामान्यं प्रत्यासत्तिरित्युच्यतेतदेत्यर्थः ननुयत्रचक्षुःसन्निकर्षेण धूमइति
ज्ञानंजनितं तत्रचक्षुःसन्निकर्षविगमेपितादृशज्ञानमादायेंद्रियसंबद्धविशेष्यकज्ञानप्रकार स्यधूमत्वादेर्धूमांतरसत्वाद्भूमां
तराणां सामान्यलक्षणयाज्ञानापत्तिः नचतदाधूमोनेंद्रियसंबद्धः ज्ञानलक्षणात्मक ... सन्निकर्षेण
धूमेसत्वात् नचतत्रैकत्वेनसामान्यलक्षणाजन्यज्ञानस्वीकारेक्षतिविरहइतिवाच्यम् तन्मूलकज्ञानधारापत्तेर्दुर्वारत्वादि
त्यतआह लौकिकोग्राह्यइति अत्रलौकिकसन्निकर्षस्यविशेषणविधयाघटकत्वंबोध्यमन्यथातत्रधूमेपूर्वकालीनत्वस्तु

तत्वेंद्रियसंबद्धविशेष्यकज्ञानेप्रकारीभूतंबोध्यम् तथाहि यत्रेंद्रियसंयुक्तोधूमादिस्तद्विशेष्यकोधूमइतिज्ञानंजातंत
त्रज्ञानेधूमत्वंप्रकारस्तत्रधूमत्वेनसन्निकर्षेणधूमाइत्येवंरूपंसकलधूमविषयकंज्ञानंजायते अत्रयदितु इंद्रियसंबद्ध
मित्युच्यते तदायत्रधूलीपटलेधूमइतिज्ञानं तत्रते नसन्निकर्षेणसकलधूमविषयकंज्ञानंनस्यात्तत्रधूमत्वेनसहें
द्रियसंबंधाभावात् मन्मतेतुइंद्रियसंबद्धंधूलीपटलेतद्विशेष्यकंधूमइतिज्ञानेतत्रप्रकारीभूतंधूमत्वंप्रत्यासत्तिः इं
द्रियसंबंधश्चलौकिकोग्राह्यः इदंचवह्निरिंद्रियस्यलेमानसस्थलेतुज्ञानेप्रकारीभूतं सामान्यंसन्निकर्षः॥रामराम

ऽसंयोगमादायतद्दोषतादवस्थ्यमितिध्येयम् इदमुपलक्षणम्यत्रचक्षुःसंयोगेविद्यमानेपिदोषात्तद्धूमत्वाद्युत्तंकिंतुधूम
त्वप्रकारकंस्मरणंतत्रधूमत्वसामान्यलक्षणाजन्यज्ञानायतिवारणाययसामान्यलक्षणाघटकज्ञानेतदिंद्रियजन्यत्वस्यवाच्य
त्वात् नचेंद्रियसंबद्धेत्यत्रलौकिकःसंबंधःज्ञानप्रकारेत्यत्रज्ञानस्यतदिंद्रियजन्यत्वंचेद्विवक्षितं तदागुणत्वेनयत्किंचिदण
वस्थितावगुणत्वसामान्यलक्षणयासकलागुणगोचरोमानसबोधोनस्यात् तदागुणतत्सोलौकिकसंबंधस्यज्ञानेमनोजन्य
त्वस्यचाभावादतआह इदंचेति तथाच वह्निरिंद्रियेण सामान्यलक्षणाज्ञेयानेजननीयेतद्विवक्षितम् नतुमानससामा
न्यलक्षणाजन्यज्ञानेइतिनोक्तदोषइतिभावः॥ ज्ञानेमनोजन्यत्वाभावादिति इदंचापतितः॥ नुस्फ्ज्ञानसामान्यस्यमनोजन्यत्वनाएतेनारत्तु
पस्थितेरपिमनोजन्यत्वात्पदित्राप्याग्रहःलौकिकसन्निकर्षेपामनोजन्यत्वादित्यर्थः
साधारणत्वेत्याद... ज्ञानस्यतदिंद्रियजन्यत्वंतदिंद्रियनिरूपितलौकिके

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यदि ज्ञानरूपेति अत्र नोपादिश्राद्धः सामान्यलक्षणाप्रत्यासत्तिरपीत्युत्तरं योज्यः सामान्यलक्षणास्वीकारे बीजमाह अत्रेति
अयमर्थः अयमभिप्रायः भानं विषयतानसंभवतीति प्रत्यक्षविषयतायाः सन्निकर्षाप्रयत्नव्याप्यत्वादितिभावः वन्हिसंबंधस
त उगृहीत्वादिति तथाच प्रत्यक्षधूमे व्याप्तेर्निश्चितत्वान्नतर्हि । धूमो व्याप्यत्वसंशयः संभवतीतिभावः अनुपस्थितत्वादिति तथा

ननु ज्ञानलक्षणाप्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादतआह विष=
का० मु०टी० ५७ यीति सामान्यलक्षणाप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति ज्ञानलक्षणा तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति अ
त्रायमर्थः प्रत्यक्षे सन्निकर्षं विना भानं न संभवति तथाच सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वन्हित्वेन
सकलवह्नीनां भानं कथं भविष्यतीति तदर्थं सामान्यलक्षणा स्वीक्रियते ननु सकलवह्निधूमभानाभावे का क्षतिरि

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः

तिवाच्यम् प्रत्यक्षधूमे वह्निसंबंधस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वाद्धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः
मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसंदेहः संभवतीतिभावः ॥
नच सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरितिवाच्यम् प्रमेयत्वेन सकलज्ञाने
जातेपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् एवं ज्ञानलक्षणाया अस्वीकारे सुरभिचंदनमितिज्ञाने

29 च धर्मित्वानाभावान्न तद्विशेष्यकोपि व्याप्यत्वसंशयः संभवतीतिभावः ज्ञानलक्षणास्वीकारे बीजमाह एवमित्यादिना कथं राम ५७
स्यादिति चंदनखंडस्य चाक्षुषे जायमाने उपस्थितसौरभभानं न स्यात् सौरभांशे चक्षुःसन्निकर्षाभावादितिभावः सौरभत्व।
प्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्याः विरहेण सौरभत्वसामान्यलक्षणयापि सौरभभानं न संभवतीतिभावः ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेनसामान्यविषयकंज्ञानमितिइंद्रियसंबद्धविशेष्यकंसामान्यप्रकारकंज्ञानमित्यर्थः यद्वासामान्यविषयकंज्ञानमात्रमित्य
र्थः सामान्यविषयकज्ञानत्वंप्रत्यासत्तितावच्छेदकमितियावत् तथाचात्रकल्पेइंद्रियसंबद्धविशेष्यकत्वप्रकारकत्वतदिंद्रिय
जन्यत्वानिज्ञानविशेषणानिनोपादेयानीति पूर्वमतेतुतदिंद्रियजन्यत्वादेर्निवेशेनेंद्रियभेदेनकार्यकारणभावकल्पनेनगौ
रवमितिभावः एतन्मतेचनिर्विकल्पकसाधारणंस्मरणसाधारणंचसामान्यज्ञानमात्रंप्रत्यासत्तिस्तथाचघटत्वप्रकारक
प्रत्यक्षत्वंकार्यतावच्छेदकंघटत्वज्ञानत्वंचकारणतावच्छेदकम् स्वप्रकारीभूतघटत्वाश्रयत्वंकार्यतावच्छेदकःसंबंधः॥
स्वविषयघटत्वाश्रयत्वंचकारणतावच्छेदकसंबंधःचक्षुःसंयोगादिशून्यकालेपूर्वोक्तातिप्रसंगस्यवक्ष्यमाणतदिंद्रियत्वे

[illegible] आसत्तिरिति प्रत्यासत्तिरित्यर्थःसामान्यज्ञानमिति तथाचसामान्यलक्षणेत्यत्रलक्षणशब्दस्यविषयोऽर्थः ते [illegible]
नसामान्यविषयकंज्ञानंप्रत्यासत्तिरित्यर्थोलभ्यते ननुचक्षुःसंयोगादिकंविनापिसामान्यज्ञानंयत्रवर्तितत्रसकल

आसत्तिराश्रयाणांतुसामान्यज्ञानमिष्यते तदिंद्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥श्रीरामायनमः

[illegible] घयदीनांज्ञानंचाक्षुषप्रत्यक्षंस्यादतआह तदिंद्रियजेतिअस्यार्थः यदावहिरिंद्रियेणसामान्यलक्षणयाज्ञानंजननीयं [illegible]
तदायत्किंचिद्धर्मिणितत्सामान्यस्यतदिंद्रियजन्यज्ञानसामग्र्यपेक्षिता साचसामग्रीचक्षुःसंयोगालोकसंयोगादिकम्

त्यादिनैववारणादितिबोध्यम् अणुत्वज्ञानमात्रेणैवसकलाणुगोचरमानसबोधोदयादाह बहिरिति आलोकसंयोगादि
कमित्यादिनादोषाभावपरिग्रहः नवग्मत इति अयमाशयः यदाघटेचक्षुसन्निकर्षादिघटितोचाक्षुषसामग्रीतदुत्तरक्षणेघ
टइतिचाक्षुषंसैवसामान्यलक्षणातयोत्तरक्षणेसकलघटविषयकंज्ञानंजन्यतइतिप्राचीनमतेन्दद्दशोकविलंबः कल्प्यतेनत्र्च
मानाभावः यदेवघटइतिचाक्षुषमुत्पद्यतेतदेवसन्निकृष्टघटांशेलौकिकमसन्निकृष्टघटांशेऽलौकिकमित्यभ्युपगमात्तथाचसाम
न्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वस्यव्यापकंघटत्वप्रकारकलौकिकचाक्षुषत्वमितिफलितम् तथाचचक्षुःसन्निकर्षा
दिशून्यकालेव्यापकधर्मावच्छिन्नजनकसामग्र्याःसत्कादित्वाःविरहादेवनचाक्षुषं सामान्यलक्षणयाज्ञानमिति॥ २॥
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कदाचित्परामर्शस्य कालान्तरे नुसन्धानात् ज्ञानस्य निश्चिततया व्याप्तिज्ञानजन्यत्वं परामर्शस्येति भावः
व्याप्तिस्मृतिजनकीभूतसंस्कार २ — संपत्त्यर्थमिति मुक्तमिति समेनान्वयः —
[illegible]

का० मु० दी० ५८

श्रीगणेशाय नमः। अनुमितिमिति। संगतिश्चात्र प्रत्यक्षोपजीव्योपजीवकभावो वा करणे निर्दिष्ट एव व्यापारे जि-
ज्ञासोदयात् मूले पश्चान्निर्दिष्टमपि करणं प्रथमं दर्शयति व्याप्तिज्ञानमिति परामर्शो व्यापार इति ननु व्यापारत्वं तज्जन्-
यत्वे सति तज्जन्यजनकत्वं तच्च परामर्शे न संभवति वह्निव्याप्यधूमवानिति परामर्शे व्याप्तिज्ञानजन्यत्वस्याभावात् महा-
नसीयवह्निधूमव्याप्तिज्ञानस्य तदानीमभावेन अभिधानात् अत स्तदुपपादयति तथाहीत्यादिना पश्यतीति धूम-
दर्शनस्य व्याप्तिस्मरणे उद्बोधकत्वविधया हेतुता संपत्त्यर्थं विशेषणविशिष्टस्य धूमस्य व्याप्तिसंबंधितया ज्ञानेन
दृष्टधूमदर्शनस्यैव व्याप्तिस्मृत्युद्बोधकत्वाभिप्रायेणाविच्छिन्नमूलामित्येवंरूपं व्याप्तिस्मरणमिति उद्बुद्धसंस्कारस्य

अनुमितिं व्युत्पादयति व्यापारस्त्विति। अनुमायामनुमितौ व्याप्तिज्ञानं करणम् परामर्शो व्यापारः। तथाहि येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित् पर्वतादावविच्छिन्नमूलामभ्रलि-

व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्। अनुमायाम्

हां धूमलेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति पश्चाच्च वह्निव्याप्यधूमवा-
नयमिति ज्ञानं भवति स एव परामर्श इत्युच्यते तदनन्तरं पर्वतो वह्निमानिति ज्ञानं जायते तदेवानुमितिः॥ श्री॥

पूर्वसत्वादिति भावः परामर्श इति तथा च स्मरणात्मकव्याप्तिज्ञानस्य पूर्वं सत्त्वान्न व्यभिचार इति भावः। न च तथापि
यत्र व्याप्तिघटकपदार्थानां विशिष्य खलो वस्थितिमूलको विशेष्ये विशेषणमिति रीत्या परामर्शः तत्र विशिष्टव्याप्ति-
ज्ञानस्य व्यभिचारो दुरुद्धर एवेति वाच्यम् व्याप्त्यंशे निश्चयत्वानिवेशप्रयुक्तलाघवेन विशिष्टवैशिष्ट्यमितिरीत्या
परामर्शस्यैवानुमितिहेतुत्वादित्यभिप्रायात् स्मरणात्मकपरामर्शे व्याप्तिज्ञानस्य व्यभिचार इत्यपि न संस्कारसंब-
न्धेन पूर्वं व्याप्तिज्ञानस्य सत्त्वात् अत एव व्याप्तिज्ञानत्वस्य परामर्शत्वव्यापकतया अनुमितिं प्रति हेतुत्वमेव नास्ति
कुतः तत्करणत्वम् अन्यथा कपालादेः घटं प्रति द्रव्यत्वेन हेतुतापत्तिः तस्मादनुमितिं प्रति मनस एव करणत्वमित्याहुः।

कार्यतावच्छेदकव्यापकधर्मवत्वेन हेतुतायोका २ —
संव्याप्तिः — तज्जन्यसंस्कारत्वसंबंधेन तस्य

[illegible]

30

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुरभिचंदनमित्यादौ सौरभादेर्भाने सौरभत्वादिसामान्यलक्षणयैव संभवति सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्र
कारकप्रत्यक्षत्वान्तरसामग्रीसहकारेणैव तस्याः फलजनकतांगीकारात् प्रकृते च द्वितीयसामग्र्याः सहकारिणः स्वत्वादिसन्निधा
येणाह यद्यपीति सौरभत्वस्य भानमिति स्वरूपतः सौरभत्वस्य भानमित्यर्थः ज्ञानलक्षणया ज्ञानलक्षणयैव तदानीं सौरभत्वांशे ध
र्मितरसाग्रहीतनया सामान्यलक्षणया तद्भानानिर्वाहादिति भावः ननु धर्मितरस्य सौरभत्वांशे ऽग्रहेपि सौरभत्वसामान्यलक्षण
यैव सौरभत्वादेर्भानमस्तु सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वादिति चेन्न सौरभत्वादिविषयताप्र
योजिकायाः स्वविषयसौरभत्वादिमत्त्वरूपसामान्यलक्षणायाः संबंधस्य सौरभत्वे ऽभावेन सामान्यलक्षणया तद्भानानिर्वाहात्।
सौरभत्वसामान्यलक्षणया कार्यतावच्छेदके सौरभत्वप्रकारकत्वनिवेशप्रयोजनाभावाच्च न च ज्ञानलक्षणायाः कारणता

यद्यपि सामान्यलक्षणया सौरभभानं संभवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं
तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया योगज इति योगाभ्यासजनितो धर्मविशेषः श्रुतिस्मृतिपुराणादि

योगजो द्विविधः प्रोक्तो युक्तयुंजानभेदतः युक्तस्य सर्वदा भानं चिंतासहकृतोऽपरः ॥

प्रतिपाद्य इत्यर्थः युक्तस्येति युक्तयुंजानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्य
सितिभावः युक्तस्य तावद्योगजधर्मसहायेन मनसाकाशपरमाण्वादिनिखिलपदार्थगोचरज्ञानं सर्वदैव भवितुमर्हे ॥ ॥
ति द्वितीयस्य चिंताविशेषोपि सहकारीति इति श्रीमन्मुक्तावल्यामलौकिकखंडः समाप्तिः ॥

तत्कल्पने गौरवमित्येव सामान्यप्रकारकत ... स्यकार्यतावच्छेदकप्रवेशादिति शंक्य
म् विशेषणज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः कारणतांतरकल्पनाविरहादिति ननु विशेषणज्ञानजन्यतावच्छेदकं
विशिष्टबुद्धित्वं ज्ञानलक्षणायास्तु विशिष्टप्रत्यक्षत्वमिति भिन्नत्वेन निर्वाहः एवं यत्र ज्ञानलक्षणायास्वविषयमुख्यविशे
ष्यकं मानसं तत्र विशेषणज्ञानकारणतया न निर्वाह इत्यत आह एवमिति ज्ञानलक्षणया ज्ञानलक्षणयैव तत्र धूमत्वज्ञा
नरूपसामान्यलक्षणायाः स्वविषयधूमत्वाश्रयत्वसंबंधेन धूलीपटले ऽभावेन सामान्यलक्षणयानुव्यवसाये धूलीपटल
भानासंभवादिति भावः सर्वदैवेति ध्यानाद्यभावेपीत्यर्थः इति श्रीमद्भारद्वाजकुलोद्योतनबालकृष्णपंडितात्मजमहादेवपं
डितकृतौ मुक्तावलीप्रकाशे प्रत्यक्षपरिच्छेदः समाप्तिः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्या॰ ६

मीमांसकः शंकते नन्विति ज्ञानं विनापीत्यस्यानुमितेर्दर्शनादित्यनेनान्वयः ज्ञानद्वयादेव ज्ञानद्वयादपि विशिष्टवैशिष्ट्या
वगाहिज्ञानमिति भावप्रधानो निर्देशः सर्वत्र न कारणमिति अनुमितित्वावच्छिन्नं प्रति न कारणतावच्छेदकमित्यर्थः आवश्य
कत्वादिति व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्याभयमतसिद्धनियतपूर्ववर्त्तितावच्छेदकताकत्वादित्यर्थः ननु
ज्ञानद्वयस्थलेपि विशिष्टज्ञानकल्पनीयमतो न व्यभिचार इत्यत आह विशिष्टज्ञानेति व्याप्यतावच्छेदकेति अयमालो
को धूमो वेति संदेहदशायां व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेपीत्यर्थः वह्निव्याप्यवानिति वह्न्यभाववद्वृत्तिमा
निरित्यर्थः ननु धूमसमानाधिकरणो न्यादि इत्यर्थः विशिष्टवानित्यर्थः ननु हेतुतावच्छेदकभानवै यमात् अनुमित्तु

ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं
तत्र ज्ञानद्वयादेवानुमितेर्दर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहि ज्ञानं सर्वत्र न कारणं किंतु व्याप्यतावच्छेदकप्र
कारकपक्षधर्मताज्ञानत्वेन कारणत्वमावश्यकत्वात् विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न व्याप्यतावच्छेद
काज्ञानेपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वात् कि
च धूमवानिति ज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात् न च
स्मरणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम् चैत्रस्य व्याप्तिस्मृतौ मैत्रस्य पक्षधर्मता
ज्ञानादनुमितिः स्यात् यदि च तत्पुरुषीयस्मरणव्याप्यतावच्छेदकप्रकारकतत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषी
यानुमितौ हेतुरित्युच्यते तदानंतकार्यकारणभावः सन्निकर्षेण समवायेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवा
येनानुमितिजनयत्यतो नानंतकार्यकारणभावः यत्तु व्याप्तिप्रकारकज्ञानं पक्षधर्मताज्ञानं च स्वतंत्रं कारणं

तेरिति तथाच व्याप्यतावच्छेदप्रकारकपक्षधर्मताज्ञानस्य तत्र व्यभिचारात् तेन रूपेण हेतुत्वमिति भावः ननु तत्र फल
बलाद्व्याप्यतावच्छेदकप्रकारकज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह लाघवाच्चेति व्याप्यतावच्छेदकप्रकारक
त्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादिति भावः नन्वस्तु तत्रावच्छेदकलाघवं तथापि पूर्वोक्तकल्पनालाघवमेवमी
मांसकानां मूलयुक्तिर्भविष्यतीत्यत आह किंचेति न च स्मरणेति अत्र शानचा ग्रहस्य वर्तमानताभिधानात्
कालांतरीयतादृशग्रहमादाय दोषः व्याप्तिप्रकारकज्ञानमिति स्वतंत्रं कारणमित्यनेनान्वयः इत्युच्यत इति इत्यंचन
ननु रूपाद्यपत्वनिवेशे चैत्रस्य व्याप्तिग्रहकालेनत्यमेव स्यानुमित्यापत्तेरभावान्मैत्रात्मनि स्वतंत्रहेतुभूतव्याप्ति
... धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः समवायेनानुमितिं प्रति स्वीयव्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नप्रकारकत्वस्य समाना
धिकरणोपकालिकविशेषणनि... धूमवत्ता घवच्छिन्न
व्याप्तिप्रकारकज्ञानविशिष्टसमवायावच्छिन्नप्रकारकपक्षधर्मताज्ञानसमवायेन हेतुरिति कालांतरे ... दवदत्तस्य धूमो वह्निव्याप्य इति ज्ञानस्य पक्ष

आलोको धूमो वेति संदेह इति वह्निव्याप्यधूमवान् पर्वत इति ज्ञानात् अनुमितिरिति विशेषणान्नाप्य व्याप्यतावच्छेदकप्रकारक
ज्ञानकारणमनुमिति विशेषणमितिगौरवमितिमिमांसकमतमसंगतम्
प्रतिभावः॥३॥

... व्यापक सामानाधिकरण्यरूप व्याप्तिज्ञानस्य हेतुता ...
... व्याप्तिज्ञाने सति पक्षे ... ज्ञानस्य
संभवेपिनहानिः॥५॥

व्याप्यतावच्छेदकावच्छिन्नेत्यर्थः॥३॥

का॰ ३१

आलोको धूमो वहिव्याप्य इति

अभिधानादिति वर्तमान
पक्षे विद्यमानविषयत्व
स्याभावे तेन तथा
विषयकज्ञानविषयत्व
ज्ञानविषयत्वस्यैव त
द्विशेषणत्वात् तथा वर्त
मानज्ञानविषय
मत्वाघवच्छिन्नप्रकार
कपक्षविशेष्यकज्ञानत्वे
न हेतुत्वं वाच्यमित्यर्थः
भावः धूमवान् पर्वत इति
मूहीत्वेनात्मकज्ञान
स्याभिप्रायमीव
च्छिन्नत्वेन तत्सादृश्यानु
मित्यापत्तेः स्वभिन्न
वर्तमानज्ञानविष
यव्याप्यतावच्छेदकप्र
कारकपक्षधर्मताव
च्छेदकज्ञानेन तथा
त्वे धूमो वह्निव्याप्य

राम
५८

©2020 Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विषयस्य च प्रत्यक्षे कारणत्वात् लिंगस्य तदानीमभावादिति भावः ॥ ४८ ॥ उभयोमेव ... ॥

लिंगमनुमितिकरणमिति अत्र मितौ परामर्शमात्रं न हेतुः किन्तु लिंगपरामर्शः तथा च विशिष्टस्य कारणतायां विशेषणस्य स्यापि कारणताऽस्तु परामृश्यमानलिंगस्य लिंगपरामर्शस्य वा हेतुत्वे तत्र विनिगमनाविरहेणोभयहेतुतास्ति इति तत्र च व्यापाराभावान्न परामर्शस्य करणता किन्तु लिंगस्यैवेत्याशयः लिंगस्य तदानीमभावादिति न च परामर्शरूपव्यापारसंबंधेन तदानीं लिंगमस्त्येवेति वाच्यम् अतीतादिलिंगस्य परामर्शजनकतया परामर्शस्य तद्व्यापारत्वासंभवात् इदमुपलक्षणम् लिंगस्य हेतुत्वे तत्रैव परामर्शविषयादिलिंगान्तरे तत्रानुमितिप्रसंगो ... तेनगुरुभूतपक्षनिवेशगौरवम् अस्मन्मते तु साध्याधिकरणपक्षस्य हेतुहेतुमद्भावे नैवातिप्रसंगाभावान्न तत्र गुरुत्वं

अनेक... हेतुतया परामर्श... बलिंगसंबंधेन...

अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं धूमादिकं लिंगमनुमितिकरणं वदंति तद्दूषयति ज्ञायमानमिति लिंगस्यानुमितिकरणत्वे युक्तिमाह अनागतेति यद्यनुमितौ लिंगं करणं स्यात्तदा अनागतेन विनष्टेन वा लिंगेनानुमितिर्न स्यात् अनुमितिकरणस्य लिंगस्य तदानीमभावादिति व्याप्यस्येति व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि

ज्ञायमानं लिंगं तु करणं न हि अनागतादिलिंगेन न स्यादनुमितिस्तदा व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते

ज्ञानमनुमितेर्जनकं तत्तु व्याप्यः पक्ष इति ज्ञानं पक्षो व्याप्यवानिति ज्ञानं वा अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यमित्याकारिका पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका द्विविधादपि परामर्शात् पक्षः साध्यवान्

पक्षनिवेशनमिति लाघवमित्यपि बोध्यम् तत्र व्याप्यस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानं च ननु परस्परं व्यभिचारत्वकमाह अनुमितिस्त्विति कार्यतावच्छेदकस्य परस्परानुमितित्वाव्यवहितत्वान्न व्यभिचार इति भावः पक्षविशेष्यकत्वमेव सर्वानुमितिनिष्ठमिति न वा नमस्तमाह द्विविधादपीति पक्षप्रकारकपक्षविशेष्यकोभयपरामर्शाद्वपीत्यर्थः कारणतावच्छेदकं च परामर्शद्वयसाधारणं व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वमिति नयत्र मतान्तरे व्यभिचारः द्विविधयोरपि परामर्शयोः स्वस्वाव्यवहितोत्तरानुमितिं प्रति तादृशेण हेतुत्वमित्यपि केचित् वस्तुतोऽनुभवानुरोधात् पक्षविशेष्यकपरामर्शस्यैव हेतुत्वमतएव वह्निव्याप्यधूमवान् पर्वत इत्याकारकः पक्षविशेष्यकबोधजनकः सर्वसंमतः

पक्षप्रकारकसाध्यविशेष्यकसाध्यत्व
साध्यप्रकारकपक्षविशेष्यकसाध्य ...

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अथवेत्यादिलक्षणमवतारयितुमवलक्षणे दोषमाह नन्विति ननु केवलान्वयित्वज्ञानकाले प्रतला घटकसंशयाभावात्तेनानुमिति स्वच्छन्दकाले तु भ्रमात्मकव्याप्तिज्ञानादनुमितिर्भवत्येवेत्यत आह किंचेति रसादावित्यादिना संयोगेन हेतुतायां गुणवान् घटादित्यादि संग्रहः ननु स्वाधिकरणवृत्तिसाध्यवदन्याभावकत्वलक्षणार्थः तथा च नेयमव्याप्तिरिति चेन्न वह्निमान्धूमादित्यादौ धूमाधिकरणे वह्निमदन्योन्याभाव [illegible] स्य कालिकसंबन्धेन वृत्तेरव्याप्तेः साध्यवत्ताग्रहविरोधिता नियामकसंबन्धेनाधिकरणस्याविवक्षितत्वात् एतयोः सत्ताभाववाञ्जात्यभाववानित्यादावव्याप्तेः जात्यभावाधिकरणे साध्यवत्ताग्रहविरोधितानियामकसमवायेन वृत्तेरप्रसिद्धेः न च सत्तावाञ्जातेरित्यादौ स्वाधिकरणेत्यादिव्याप्तिज्ञानं कारणम् सत्ताभाववाञ्जात्यभाववानित्यादौ साध्यवदन्येत्यादिव्याप्तिज्ञानं कारणमितिवाच्यम् तथापि संयोगसंबन्धावच्छिन्नघटाभावसाध्यविषयितया हेतौ घटत्वलक्षणद्वयस्याप्यव्याप्तेः तत्र विषयितया हेत्वधिकरणे

ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः किंच सत्तावाञ्जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसंबन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरत आह अथवेति हेतुमन्निष्ठवृत्तिर्यः स तथा विरहोऽभावः तथा च हेत्वधिकरणवृत्तिर्योऽभावः तत्प्रतियोगिना साध्येन हेतोः सामानाधिकरण्यं व्याप्तिः अत्र यद्यपि वह्निमान्धूमादित्यादौ हेत्वधिकरणे पर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्नौ देरस्तीत्यव्याप्तिः न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यम् तत्तद्धे

अथवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते॥

रण्युभयाभावसत्त्वादेकसत्त्वेऽपि द्वयं नास्तीति प्रतीतेः गुणवान्द्रव्यत्वादित्यादावव्याप्तेश्च तथापि साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति वाच्यम् ननु रूपत्वव्याप्यजातिमद्भ्यः पृथिवीत्वादित्यत्र साध्यतावच्छेदकारूपत्वव्याप्यजातयः ता नीलत्वपीतत्वादिरूपाणां नीलघटादिवृत्त्यभावप्रतियोगितानवच्छेदकत्वमसीत्यव्याप्तिरिति चेन्न तत्र परंपरया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्तीत्यर्थः

ज्ञाने साध्यवत्ताग्रहविरोधिता नियामकसंयोगेन तत्प्राभूतले संयोगेन घटाधिकरणे हेतुतावच्छेदकविषयितया च वृत्तेरप्रसिद्धेः नन्वतिरिक्तोभयाभावमानाभावः इत्यत आह एकसत्त्वेऽपीति इदमुपलक्षणम् विशिष्टाभावमादाय व्याप्तिरस्त्यपि बोध्यम् ननु वैशिष्ट्यमासज्य वृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणान्नाव्याप्तिरित्यत आह गुणवानिति अत्र हेतोरेकव्यक्तित्वात्समानाधिकरणयोरेव व्याप्तिरित्युक्तावपि न निस्तार इति भावः एतद्रूपवान् तद्रसादित्यादौ लक्षणस्यासंभवात् भवादाह अव्याप्तेरिति इति वाव्याप्तिरिति गुणत्वस्य द्रव्यत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वान्नाव्याप्तिरिति भावः परंपरयास्वाश्रयसमवायेन तत्पाचीक्ष्यं परंपरया यस्य द्वच्छेदकं तदन्यत्वस्य जातित्वे सत्ता नाव्याप्तिरिति भावः तादृशधर्मावच्छिन्नाभावः अनुपरंपरया रूपत्वव्याप्यजातित्वावच्छिन्नस्य समवायेनाभावः नास्तीत्यत्वात्पृथिव्यामित्यनुषज्यते॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गौरवस्य स्वरूपतः प्रतिबंधकत्वात् ... तत्राह ॥

ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुता तत्र विनिगमनाविरहेण हेतुताद्वयं तथापि तत्र आह ॥ व्याप्तिविशिष्टत्वा
वच्छिन्नप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिज्ञानत्वेन हेतुत्वस्य विवक्षितत्वात् वह्निव्याप्यवान् इति अनुमितिः स्यादिति न्यायनये तु व्याप्तिप्रकारतानिरूपितधूमप्रकारतायाः पर्वतविशेष्यता
त् नतादृशज्ञानात् वा धूमो वह्निव्याप्यो धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः तत्र व्याप्तिप्रकारतानिरूपित धूमप्रकारताया विषयतीत्यत आह इत्थं चेति फलमु
निरूपितप्रकारतात्मकत्वादिति भावः ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पनागौरवं न्यायमते दूषणं भविष्यतीत्यत आह इत्थं चेति विशिष्टज्ञानत्वधर्मिक
त्वगौरवस्येति फलं कार्यकारणभावग्रहः तन्मुखत्वं तदधीनत्वं गौरवं गुरुत्वज्ञानमित्यर्थः विशिष्टज्ञानत्वावच्छेदेन कारणता ग्रहे विशिष्टज्ञानं कल्पनीयं फलमुखगौर

वह्निव्याप्यो धूम आलोकवान् पर्वत इति ज्ञानादप्यनुमितिः स्यादिति इयं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयं ... साध्यवान् महानसादिः त
वत्सादावव्याप्तेरिति व्याप्योनाम व्याप्त्याश्रयः तत्र व्याप्तिः केत्यत आह व्याप्तिरिति वह्निमान् धूमादित्यादौ साध्यं वह्निः साध्यवान् महानसादिः सवान्नाति आप्तिः अत्र
वत्सादावव्याप्तेरिति ... धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिन् अयःपिण्डादौ वह्नेः सत्वात् ... तत्र धूमस्य वि
ह्नो जलह्रदादिः तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिन् ... महानसादिः तत्र धूमस्य वि
येन संबंधेन साध्यं तेन संबंधेन साध्यवान् बोध्यः अन्यथा समवायसंबंधेन वह्निमान् वह्नेरवयवस्तदन्यो महानसादिः ... तेन यत्किंचिद् वह्निमतो महानसादेः
धमानत्वादव्याप्तिप्रसंगात् साध्यवदन्यस्य साध्यवत्तावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः तेन यत्किंचिद् वह्निमतो महानसादेः

व्याप्तिः साध्यवदन्यस्मिन् असंबंध उदाहृतः ॥

... पर्वतादौ धूमस्य सत्वेपि न क्षतिः येन संबंधेन हेतुता तेनैव साध्यवदन्यावृत्तित्वं बोध्यं तेन साध्यवदन्यस्मिन् धूमावयवे धू
मस्य समवायसंबंधेन सत्वेपि न क्षतिः साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वाभावः ... प्रतियोगिताकाभावः तेन धूमवा
न् वह्नेरित्यत्र यत्किंचित् साध्यवदन्यह्रदादिवृत्तित्वाभावेपि नातिव्याप्तिः अत एव यद्गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ विशि
ष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादावृत्तित्वं नास्तीत्यपि हेतुतावच्छेदकरूपेण वृत्तित्वं बोध्यम् हेतुता
६२
... गौरवनिश्चयो विशि
गौरवनिश्चयो विरोधी वाच्यः ननु गौरवं प्रमाणं ... अनुमित्यव्यवहितपूर्ववर्तित्वाश्रयकत्वमेव नारदगौरवनिश्चयो विशि
ष्टज्ञानत्वेन कारणत्वनिश्चयाधीनः स्वघटकीभूततदनुमित्यव्यवहितपूर्ववर्तित्वाश्रयनिर्णयं विना न संभवतीति कार्यकारणभा
वनिर्णयात् पूर्वं गौरवनिर्णयाभावान्न तादृशगौरवं दोष इति भावः मूले परामर्शलक्षणानंतरं व्याप्तिनिरूपणोसंगतिमुपोद्घातं नि
रूपयति व्याप्यो नामेति तत्रेति घटकत्वसप्तम्यर्थः अव्याप्तिप्रसंगादिति अव्याप्यभिधानमिदं येन केनचित् संबंधेन साध्यवत्व
विवक्षणेऽभिप्रायेण यदि च संबंधसामान्येन साध्यवत्वं विवक्ष्येत तदा धूमवान् वह्नेरित्यादावतिव्याप्तिर्बोध्या अवृत्तित्वं
... निरूपकतावच्छेदक
त्वमिति विशिष्टाधेयतायाः ... मात्रं साध्यवत्प्रतीक ... मतेमात्रं
नचेति विशिष्टज्ञानत्वेन ... संबंधस्य ... कालिकविशेषणतासंबंधेन ... साध्यवत्प्रतीक ... कालिकेन जन्यमात्रं साध्यवत् ...
... इतिभावः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नन्वेवं हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः [illegible] सत्ताभावस्य निरुक्तप्रतियोगित्वे अधिकरणाभावादव्याप्तिविरहादित्य आह स्वप्रतियोगीति निष्कर्षः इति प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावाननिष्कर्षेऽस्त्वर्थः तथाच हेतुसमानाधिकरणविशेषणबलादेव ताद्दशप्रतियोगिव्यधिकरणलाभात्तद्वैयर्थ्यमिति भावः सत्ताधिकरणत्वेपीति तथाच विशिष्टसत्ताभावो न प्रतियोगिव्यधिकरणः अभावो न प्रतियोगिता याम्प्रानवच्छेदकमेव विशिष्टसत्तात्वमित्यतिव्याप्तिरिति भावः तदसिः नाति व्याप्ति एव मतेपि ननु प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वमुच्यतां तावता विज्ञानवान्सत्त्वादित्यादानेवेति प्रसंगादित्यत आह दूषयेति साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वविवक्षणेन त्वर्थः वह्निविरहस्तथैवीति तथाच प्रतियोगितावच्छेदकसमवायेन प्रतियोगिव्यधिकरणता दृशाभावप्रतियोगितावच्छेदकत्वादव्याप्तिः साध्यतावच्छेदकसंबंधेन

प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितानिष्कर्षः प्रतियोग्यनधिकरणंच प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यम् तेन विशिष्टसत्तावान्जातेरित्यादौ नासाधिकरणगुणादेः विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपि नक्षतिः [illegible] समवायसाध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं बोध्यम् तेन तत्वान्वान्सत्वादित्यादौ सत्ताधिकरणघटादेः विषयतया [illegible] तेयाश्रानाधिकरणत्वेपि न क्षतिः इदंच वह्निमान्धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्वेपि न क्षतिः ननु प्रतियोगितावच्छेदकावच्छिन्नस्य पक्षस्य [illegible] वनधिकरणत्वं तत्सामान्यस्य यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकर एवं वाविवक्षितम् आद्येकपिसंयोगेन तद्वृत्तत्वादित्यत्राव्याप्तिः कपिसंयोगाभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृत्तिरपि कपिसंयोगो भवति तदनधिकरणंच वृत्तत्वादिति द्वितीयेतु प्रतियोग्यधिकरणाभावाप्रसिद्धिः सर्वस्यैवाभावस्य पूर्ववृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् नच वह्निमान्धूमादित्यादौ घटाभावादेः पूर्ववृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वेपि पर्वतादेस्तथापि साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोग्यधिकरणाभावाप्रसिद्धिरिति वाच्यम् घटाभावपटाभावस्य घटाभावात्मकतया

वच्छिन्नत्वेनाप्रतियोगितावच्छेदकत्वेतुसंबंधद्वयप्रवेशेनगौरवमितिभावः नक्षतिः नाव्याप्तिः समवायेन वह्न्यभावस्य साध्यतावच्छेदकसंयोगेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वाभावादितिभावः तत्सामान्यस्य प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य यत्किंचिदिति यत्किंचित्प्रतियोगितावच्छेदकतदवच्छिन्नसामान्यस्य वेत्यर्थः पूर्ववृत्तेतिपूर्ववृत्तित्वविशिष्टस्यस्वस्य घटाभावादेयोऽभावस्तदात्मकेत्यर्थः घटाभावाद्यधिकरणेपि पूर्ववृत्तित्वविशिष्टघटाभावादेरभावस्योक्तरूपेणावच्छेदेन सत्वादितिभावः नच पूर्ववृत्तित्वविशिष्टस्यघटाभावादेरभावः स्वाभावस्य प्रतियोगीन घटाभावादेरितिवाच्यम् पूर्ववृत्तित्वविशिष्टस्य घटाभावादेयोऽभावः तदभावस्य पूर्ववृत्तित्वविशिष्टघटाभावस्य [illegible] प्रतियोगित्वात् तथा करणवृत्तित्वविशिष्टाभावप्रतितानधिकरणवृत्तित्वविशिष्टप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावपदत्वात् [illegible] प्रतियोगितानधिकरण [illegible] नचेदं तत्र तत्र तथा इत्यनमति ताद्दशाभावेनात्यर्थ [illegible] भावपदेन [illegible] प्रतियोग्यनधिकरण [illegible]

राम ६९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रतिद्रूट: रूपत्वमाप्यजातित्वादूरतद्रूपात् = ४

मतांतरमाह साध्यादीति आदिना साधनपरिग्रहः आप्तेर्भेदादिति व्याप्तित्वानस्यकारणतावभेदादित्यर्थः पूर्वोक्तरीत्यानिर्वाहे तत्र साध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितावच्छेदकतानवच्छेदकत्वप्रकारकज्ञानस्य हेतुत्वं नोचितं कारणतावच्छेदकगौरवात् न च पूर्वोक्तरीत्याजातिमान्नित्यो वानुमितिः स्यात् तु जातिमद्वानित्याकारिकैवेति वाच्यम् पृथिवीत्वादिहेतुकेजातिमानित्यो वानुमित्याकारेजातिमद्वानित्याकारस्तु तन्न व्याप्तिर्हेतुकस्य दोषादित्यपि वदंति भ्रामस्त्वरसः सूचितः अद्रव्यसत्ताधिकरणेति न च विशिष्टनिरूपिताधिकरणतायाः हेतुतावच्छेदकसंबंधत्वे कथं तेन संबंधेन सत्ताधिकरणं गुणः समवायस्य तथात्वे तु द्रव्यत्वेसाध्ये विशिष्टसत्तायाः अभिचारित्वात् तत्राव्याप्त्यभिधानमसंगतमिति वाच्यम् साध्याभाववद्वृत्तितावच्छेदकहेतुतावच्छेदकवत्वस्यैव अभिचारपदार्थत्वे तथा च द्रव्यसमवायसंबंध

तथा च रूपत्वसाप्यजातेरभावप्रतियोगितावच्छेदकत्वमिति जातित्वस्य प्रतियोगितावच्छेदकताभावान्न व्याप्तिः मूल

व्याप्तिकसाध्य दकस्थले = २

साध्यादिभेदेन व्याप्तिभेदान्नाद्वाश्रयत्वेसाध्यतावच्छेदकतावच्छेदकप्रतियोगितावच्छेदकतानवच्छेदकभिन्नेवलक्षणघटकमित्यपि वदंति हेत्वधिकरणे च हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यं तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ अद्रव्यसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य नाव्याप्तिः हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं तेन समवायेन धूमाधिकरणं तदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाव्याप्तिः अभावप्रतियोग्यनधिकरणं बोध्यः तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य नाव्याप्तिः न च प्रतियोग्यनधिकरणत्वपदिप्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवाव्याप्तिः प्रतियोगिनः कपिसंयोगस्यानधिकरणेगुणादौ वर्तते योऽभावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात् यदि तु प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगी सत्त्वादित्यादावतिव्याप्तिः सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम् हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षित ॥

स्य हेतुतावच्छेदकसंबंधत्वेऽपि विशिष्टसत्तायास्तद्वैतोर्व्यभिचारित्वाभावात् नाव्याप्तिरिति न च हेतुतावच्छेदकविशिष्टसत्तात्वविशिष्टसत्तायाः अधिकरणत्वस्य गुणे सत्त्वादेव विवक्षणेऽपि कथमव्याप्तिपरिहार इति वाच्यम् हेतुतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वस्य विवक्षितत्वात् विशिष्टसत्तात्वस्य गुणनिष्ठाधिकरणतानिरूपितावच्छेदकतानवच्छेदकतया तदवच्छिन्ननिरूपिताधिकरणत्वस्य गुणेऽभावादिति तथैव तदवस्थैव तस्यैव वृत्तेरिति अधिकरणभेदेनाभावभेदानभ्युपगमादिति भावः प्रतियोग्यधिकरणावृत्तित्वम् प्रतियोग्यधिकरणवृत्तिभिन्नत्वम् विवक्षितत्वादिति प्रतियोगिव्यधिकरणपदेन विवक्षितत्वादित्यर्थः ॥

ननु प्रतियोगितदधिकरणावृत्तित्वमेव प्रतियोगिव्यधिकरणमभावे निवेश्यं तु कपिसंयोगाभावस्य व्याप्यवृत्तित्वात् विरुद्धधर्मसमावेशानवकाशत् [illegible] कपिसंयोगाभावस्य प्रतियोगिनधिकरणवृत्तित्वाभावात् प्रतियोगिनधिकरणगुणादिवृत्तिकपिसंयोगाभावस्य तस्मान्न [illegible] तुगोत्वाद्यभावे एवं तत्प्रतियोगिता न तु वृक्षे कपिसंयोगा [illegible] साध्यतावच्छेदकमिति तथा व्याप्तिः न वा प्रतियोगिसत्ताद्यसत्तावृत्तिव्याप्तिः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु महाकालमात्रवृत्तिविशेषणताविशेषेण साध्यतायां महाकालान्यत्वविशिष्टघटाभावोपि न प्रतियोग्यधिकरणस्तत्र
तेन संबंधेन महाकालान्यत्वविशिष्टघटाधिकरणाप्रसिद्धेरत आह वस्तुतस्त्विति अत्र प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यन(
धिकरणहेत्वधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितत्वलक्षणाकरणीयिकालोघ(
टत्वानित्यादावव्याप्तिस्तदवस्थैव साध्यतावच्छेदकसंबंधावच्छिन्नताहशप्रतियोगिताया अप्रसिद्धेरतः प्रतियोगिताधर्मिकोभ्या
भावप्रयंतानुधावनं समवायेन वह्न्यभाव ... तियोगितायां वह्नित्वावच्छिन्नत्वसत्वात् संयोगेन घटाभावप्रतियोगितायां साध्यताव(

का०
मु०टी०
६२

वस्तुतस्तु प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधा
वच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभाववत्तेन संबंधेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यः संबंधः साध्यतावच्छेदकसं
बंधः यद्धर्मः साध्यतावच्छेदकं तत्र यदि यद्धर्मावच्छिन्नत्वाभावमात्रमुच्यते तदा समवायेन न्योवह्न्यभाववत्तस्य प्रतियोगिताव
च्छेदकसंबंधः समवायः तेन प्रतियोग्यनधिकरणपर्वतादिवृत्तिः स एव तत्प्रतियोगितावच्छेदकं च वह्नित्वमिति व्याप्तिः स्यात्
यत्किंचित्संबंधावच्छिन्नत्वाभावमात्रमुच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसंबंधावच्छिन्नत्व
सत्वादव्याप्तिः स्यादत उभयमुपात्तं द्रव्यं च कालो घटवान् कालपरिमाणादिमान् दासंयोगसंबंधेन घटाभावप्रतियोगिनो घटस्य
नधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावस्तत्प्रतियोगितायां कालिकसंबंधावच्छिन्नत्व घट
त्वावच्छिन्नत्वोभयाभावसत्वान्नाव्याप्तिः ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्न ... प्रसिद्धं गुरुधर्मस्यान(
वच्छेदकत्वादिति चेत् कंबुग्रीवादिमान्नास्तीति प्रतीत्या कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगिताविषयीकरणान्न गुरुधर्मस्य
प्यवच्छेदकत्वस्वीकारात् लघुसमनियतगुरुधर्मस्यानवच्छेदकत्वात् यद्वा हेतुसमानाधिकरणान्योन्याभावप्रतियोगि
तानवच्छेदकसाध्यवत्तावच्छिन्नवृत्तित्वं व्याप्तिः अन्योन्याभावस्याप्यवृत्तित्वाभावात् प्रतियोगिवैयधिकरण्यं न निवेश्य ।।श्रीश्रीश्री।।
मतो वलाघवं अन्यत्सर्वं पूर्ववदिति संक्षेपः।। ।।श्री।।

34

वह्निमान् धूमादित्यादावव्याप्तिवारणाय यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वयोर्निवेशः संयोगे
च्छेदकसंयोगावच्छिन्नत्वस्य सत्वाद्वह्निमान् धूमादित्यादावव्याप्तिवारणाय सामान्यमिति अप्रसिद्धमिति तथा चाया(
न घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वघटितोभयाभावसत्वादिति व्याप्तिवारणाय सामान्यमिति अप्रसिद्धमिति तथा चाया(राम
न घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वघटितोभयाभावसत्वादिति कंबुग्रीवादिमत्प्रतियोगिकाभाव एव विषयो न तु कंबुग्रीवादिमत्त्व(६२
विशिष्टिताभावः यत्किंचित् कंबुग्रीवादिमान्नास्तीत्यादेः कंबुग्रीवादिकं कंबुग्रीवादिमत्प्रतियोगिकाभाव एव विषयो न तु कंबुग्रीवादिमत्व(
नत्प्रतियोगितावच्छेदकत्वमपीत्यजनतदायत्किंचित् घटत्वमपि कंबुग्रीवादिमान्नास्तीति वाक्यस्य प्रामाण्यापत्तिरिति दूषणिति धाया
हसंक्षेपइति ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

घटाभावात्मकतयेतिप्रभावाधिकरणाभावसाधिकरणानतिरिक्तत्वादितिभावः इत्यादावित्यादिनाऽभावसाधकसद्धेतुमात्रपरिग्रहः स्वरूपसंबंधइति अभावीयविशेषणतेत्यर्थः एवंवृत्तिमत्वविशिष्टस्वाभावेति पूर्वक्षणवृत्तित्वविशिष्टस्य तत्संघटाभावादिः तदभावात्मकेत्यर्थः प्राचांमतेद्रव्यसंयोगसामान्याभावानंगीकारादाह कपीति घटाभावोयत्किंचित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्यहेत्वधिकरणेसंभवान्नप्रतियोगिव्यधिकरणाभावाप्रसिद्धिनिबंधनाव्याप्तिः संभवतीतिभावः घटत्वहेतुकेयत्किंचित्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वंहेत्वधिकरणघटादेर्नसंभवति उत्पत्तिकालेघटेगुणसामान्याभावसत्वादतस्तत्पर्यंतानुधावनं तृतीयविवक्षानुसारेणसमाधत्ते यादृशेति यादृशाः प्रतियोगितायाः अवच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तादृशाः प्रतियोगितायाः अनाश्रयत्वमित्यर्थः विवक्षितत्वात् अप्रतियोगिपदेनविवक्षितत्वात् कपिसंयोगाभाव

यदिघटाभावादेव धूमाभावादिर्भिन्न इत्युच्यतेतदापिधूमाभाववान्वह्न्यभावादित्यादावव्याप्तिः ननु ... छेदकसंबंधः स्वरूपसंबंधस्तेनसर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वाद्धेत्वधिकरणस्येति तृतीये तत्संतुकपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिः तत्रात्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्यप्रतियोगितावच्छेदकगुणसामान्याभावत्वमपितदवच्छिन्नानधिकरणत्वंचहेत्वधिकरणस्यात्मन इति मैवं यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तादृशप्रतियोगितावच्छेदकस्यविवक्षितत्वात् ननुकालोघटवान्कालपरिमाणादित्यत्रप्रतियोगिव्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरणस्यमहाकालस्य जगदाधारतया सर्वेषामेवाभावानांसाधनतावच्छेदकसंबंधेनकालिकविशेषणतयाप्रतियोग्यधिकरणत्वात् अत्रकेचित् महाकालभेदविशिष्टघटाभावस्तत्रप्रतियोगिव्यधिकरणः महाकालस्यघटाधारत्वेपिमहाकालभेदविशिष्टघटानाधारत्वात् महाकालेमहाकालभेदाभावात् ॥ श्री ॥

वानात्मत्वादित्यादौगुणसामान्याभावत्वावच्छिन्नप्रतियोगितायाएवयादृशप्रतियोगितापदेनोपादातुंशक्यतयातदवच्छेदकत्वस्यकपिसंयोगाभावत्वेसत्वान्नाव्याप्तिरिति ननु अत्रचयद्धर्मविशिष्टानधिकरणत्वंहेत्वधिकरणस्यतद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्यलक्षणत्वेअस्यसंभवेपिघटाभावेप्रतियोगिवैयधिकरण्यंदुर्लभम् ... साध्यतावच्छेदकसंबंधेनप्रतियोग्यनधिकरणत्वविवक्षणेव्याप्तिंशंकते नन्विति महाकालभेदविशिष्टघटाभावइति अभावीयकालिकविशेषणतासंबंधेनसामानाधिकरण्यसंबंधेनमहाकालभेदविशिष्टस्यघटस्याभावइत्यर्थः महाकालभेदाभावादितिअभावीयविशेषणतासंबंधेनमहाकालभेदाभावादित्यर्थः सामानाधिकरण्यघटकीभूतविशेषणविशेष्यसंबंधाभावात् यत्रविशेषणविशेष्यभावस्तत्रैव विशिष्टाधिकरणत्वोपगमादितिभावः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सिद्धौ सत्यामसत्यां चेति सत्यां विशेषणाभावमात्रप्रयुक्तस्यासत्यां तु धर्मिभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादिति भावः सि
द्धेः सत्वेन।
तदभावः प्रप।
त्तीयात्मनो बाधि
ति भावः सिसाधयिषा
विरहविशिष्टत्वं च सिद्धेर्विक
कालावच्छेदेनैकान्तरनियम
तेनात्र सिसाधयिषाकालीनसिद्धेः का
लिकसंबंधेन सिसाधयिषाविरहविशिष्ट
त्वेन व्याप्तिः परामर्शजन्यकारणत्वसिद्धेर्नुप
विरोधिसत्वेपि अनुमितिस्स्यात्तदानस्यात्तेजकत्वं।
यावन्नयेन न संभवतीति शंकते नन्विति परामर्शानंतरं
परामर्शोत्पत्तिद्वितीयक्षणे ततः सिद्ध्युत्पत्तिद्वितीयक्षणे क्र
मेणाव्यवधानेन एवमन्यत्रापीति यत्र परामर्शसि।
साधयिषासिद्धयः क्रमेण एवं सिद्धिसिसाधयि
षापरामर्शाः एवं सिसाधयिषापरामर्श
सिद्धयः तत्रेष्टापत्तिः सिद्धिपरामर्शौ
भयक्षणे इत्यर्थः॥ श्रीगुरु
चरणकमलेभ्यो न
मः श्रीरामा
नुजाय
न
मः रामाय रामभद्राय रामचंद्राय वेधसे॥ रघुनाथाय नाथाय सीतायाः पतये नमः॥ श्रीमते रामानुजाय नमः श्रीरामाय नमः

का॰
मुक्ती॰
६३

35

राम
६३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मूले पक्षतानिरूपणे संगतेरप्रदर्शनात्तां दर्शयति पक्षतेति वक्ष्यमिति तथा च प्रकृतस्य परामर्शस्य घटकतया पक्षधर्मत्वमपि [illegible]ने [illegible]पपादके तन्निरूपणे योद्घातसंगत्या पक्षतानिरूपणम् आशिनिश्चितैककार्यकारित्वमेव संगतिः [illegible] मूले प[illegible]ताल[illegible]णस्य स्पष्टतयाऽनुक्तेः पक्षतालक्षणं स्वाभिप्रायं दर्शयन्मूलार्थमाह सिसाधयिषाविरहेति घनगर्जितेनानुमेघानुमिति

[illegible]मिति मित्यत्र पक्षत्वं किं तदाह सिसाधयिषयेति सिसा[illegible]धयिषाविरहविशिष्टायाः सिद्धेरभावः पक्षता न त्वात्मत्व [illegible] सिसाधयिषामात्रं न पक्षता विनापि सिसाधयिषां घनगर्जितेन मेघानुमानात् अत एव साध्यसंदेहोऽपि [illegible] विनापि संदेहं तदनुमानात् सिद्धौ सत्यामपि सिसाधयिषासत्त्वेऽनुमितिर्भवत्येव अतः सिसाधयिषा [illegible] विशिष्टत्वं सिद्धौ विशेषणम् तथा च यत्र सिद्धिर्नास्ति तत्र सिसाधयिषायां सत्यामसत्यामपि पक्षता न त्विसि

सिसाधयिषया [illegible]सिद्धिर्यत्र नास्ति स पक्षस्तत्र वर्तित्वज्ञानादनुमितिर्भवेत्

साधयिषा [illegible] तत्र सिद्धौ सत्यामसत्यां च पक्षता [illegible] सिद्धिरस्ति सिसाधयिषा च नास्ति तत्र तु न पक्षता सिसाधयिषाविरहविशिष्टसिद्धेः सत्त्वात् ननु यत्र परामर्शानन्तरं सिद्धिस्ततः सिसाधयिषा तत्र सिसाधयिषाकाले परामर्शनाशान्नानुमितिः यत्र सिद्धिपरामर्शौ सिसाधयिषा [illegible] क्रमेण भवन्ति तत्र सिसाधयिषाकाले सिद्धिर्नाशात्मति [illegible] बंधकाभावादेवानुमितिः यत्र सिसाधयिषासिद्धिपरामर्शास्तत्र परामर्शकाले सिसाधयिषैव नास्ति एवमन्य

स्थले [illegible] सिसाधयिषामात्रस्य पक्षतात्वं निषेधयति सिसाधयिषामात्रं नेति मेघानुमानात् मेघानुमितेः अत एव वक्ष्यमाणदूषणादेव सिसाधयिषाविरहरूपविशेषणस्य प्रयोजनमाह सिद्धौ सत्यामिति मत इति मत्रानुमितिति [illegible] वहिक पक्षतासंपत्त्यर्थमित्यर्थः [illegible] सत्त्वविशेषणाभाव।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का० मु० टी० ६६४

वह्निमात्रेति प्रत्यक्षातिरिक्तं ज्ञानं जायतामित्यस्य प्रागुक्तसामग्रीसत्त्वे इत्यादिः शाब्दसामग्रीसत्त्वे शाब्दबोधेनैव तत्र । इष्टत
सिद्धिसंभवात् भवत्येवेत्यनुमितिरित्यनेन संबध्यते न चाचानुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वेनत्राकु ...तेनं स्या
दितिभावः तल्लिंगकत्वप्रवेशस्य फलमाह एवमित्यादिना नानानुमितिविषयिणीच्छापास्तत्तद्व्यक्तित्वेनोत्तेजकतया तदिच्छाय
क्रेरनुत्तेजकत्वादितिभावः इदं तु बोध्यम् पर्वते वह्न्यनुमितिर्जायतामित्याद्यनुगतेच्छानां पर्वतत्वावच्छिन्नोद्देश्यक
त्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वेनानुगतरूपेणैवोत्तेजकत्वं प्रत्यक्षातिरिक्तं

वह्निव्याप्यधूमवान्पर्वतो वह्निमानितिप्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं वह्निज्ञानं जायतामितीच्छायामनुभवस्येवेति एवं
धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमितिः सिसाधयिषाविरहकालेपि तादृशसिद्धिसत्त्वे
नानुमितिः तादृशी सिद्धिः तत्रस्त्वनुमितौ विशिष्य प्रतिबंधिका तत्त्वापेन पर्वतः तेजस्त्वीयाव्याप्यमयो वह्निमानिति
ज्ञानसत्त्वेपि नानुमितिविरोधः एवं तु पदतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्

ज्ञानं जायतामित्याद्यननुगतेच्छानां तत्तद्व्यक्तित्वेन तु सकलेच्छानां तत्तद्व्यक्तित्वेन गौरवादिति सिसाधयिषाकाले पर्व
तो वह्निमानितिसिद्धिसत्त्वेपि पर्वतो वह्निमानित्यनुमित्युत्पत्तेः तादृशसिद्धेर्नैतादृशानुमितिप्रतिबंधकत्वं स्यादतउक्तं सि
साधयिषाविरहकाल इति विशिष्य वक्तव्येति पर्वतो वह्निमानित्याद्यनुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपित
वह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबंधकतावच्छेदकत्वमर्थः तत्प्रयोजनमाह तेनेति । ७ ।श्री ७ ।श्री ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नानुविशिष्टसिद्ध्यभावस्य पक्षतात्वे लिङ्गपरामर्शसत्वे यत्किंचिज्ज्ञानं जायतामितीच्छासत्वेप्यनुमित्यापत्तेः पर्वतो देशपकवह्निविधेयकानुमिति [illegible]
नपरामर्शोत्तरं [illegible] परामर्शसत्वे आलोके न पर्वतो देशपवह्निविधेयकानुमितिं जायतामितीच्छासत्वेप्यनुमित्यापत्तेः [illegible]
काचपक्षताभिन्नपर्वतो देशकत्वप्रकारताभिन्नवह्निविधेयकत्वप्रकारताभिन्नानुमितित्वप्रकारताभिमकारता [illegible]

कथमिति किमर्थमित्यर्थः इति प्रत्यक्षमिति अनुमितौ इच्छाधीनत्वविषयकमिति शेषः अन्यदोत्पत्तेः पर्वतमनुमिनोमीच्छाधीनता
धीत्वीकारे इच्छासामग्र्याः प्रतिबन्धात् अन्यदमेव नस्यादिति यादृश्या यादृश्यादि घटानुमितिं जायतामितीच्छासत्वे पर्वतो वह्निमा
निति सिद्धं धूमसत्वे पर्वतो वह्निमानित्यनुमित्युत्पत्तेः पर्वतो वह्निमानिति सिद्धिसत्वेपि मदिच्छावलात्तादृशानुमित्यापत्तिरतउक्तं
सिद्धिसत्वइति इदं चोत्तेजकेच्छाव्यक्तेः परिचायकं तत्तदुत्तेजकत्वं तु तत्तद्व्यक्तित्वेनैवेति बोध्यम् तेन तत्तदिच्छाघटउत्तेजकत्वे
न यत्किंचिज्ज्ञानमित्यस्येतदुत्तरकालीनमित्यादिः अन्यथा यत्किंचिज्ज्ञानस्य सर्वदासिद्धत्वेन तद्रूपेच्छाविरहात् नानुमि

योग्यविशेष्यविशेषणानां योगपद्यनिषेधात्कथं सिसाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न यत्र वह्नि
व्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः सिसाधयिषा तत्र यत्क्षणे पक्षे पक्षतादिशेषणत्वावश्यकत्वा
दिति यद्वेदं बोध्यम् यादृश्या यादृशसिसाधयिषासत्वेपि सिद्धिसत्वे यल्लिंगकानुमितिस्तादृशा तादृशसिसाधयिषाविरहविशि
ष्टसि [illegible] अभावः तल्लिंगकानुमित्यापत्तेरिति तेन सिद्धिपरामर्शसत्वे यत्किंचित् ज्ञानं जायतामितीच्छायामपि नानुमितिः

तिरिति नानुमित्यापत्तिरित्यर्थः तदिच्छायास्तत्तद्व्यक्तित्वेनोत्तेजकत्वान्न पृथगुक्तमिति भावः नच यत्किंचिज्ज्ञानं जायता
मित्येतादृशेच्छाकाले सिद्धिकालेप्यनुमितिर्भवत्येवेति वाच्यम् अनुमितिसामग्रीसत्वे आत्मादिविषयकयत्किंचिज्ज्ञानसादि
सामग्रीसत्वनियमेन यत्किंचिज्ज्ञानं [illegible] संभवात् ननु अनुमितित्वप्रका
रकेच्छात्वेनाद्युत्तमत्वेनोत्तेजकत्ववाच्या तावतेव यत्किंचित् ज्ञानं जायतामितीच्छावारणासंभवात्तु तत्तद्व्यक्तित्वे
नोत्तेजकत्वं कल्पं गौरवादित्यत आह॥ ॥श्री॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यद्यपि ... प्रामाण्य ...
त्वमनुमितिप्रतिबंधकतानवच्छेदकत्वात् ...
नवत्तिविशिष्टवह्न्यभाववद्वृत्तित्वावच्छिन्न ...

का० मु० टी० ६४

हेत्वाभासानिति विभजत इत्येककार्यकारित्वमत्र संगतिबोध्यमनुलक्षणात्मकसाधारणधर्मज्ञानं विना विशेषेणज्ञानासंभवादि भागोक्तिः प्रयोजनकं इत्यतो लक्षणमाह तल्लक्षणं त्विति हेत्वाभासलक्षणं त्वित्यर्थः लक्ष्यलक्षणमाह यस्येति यथा हीति तेऽभिचारादयः ननु यद्विषयकत्वेनेत्यत्र तत्त्वं नीपाधिः व छेदकत्वं तथा च वह्निमान् ह्रदादित्यत्र वह्न्यभाववान् व्याप्तिः पर्वतविशेष्यक वह्न्यभावप्रकारक निर्णयत्वेन वह्न्यनुमितिं प्रतिबंधकत्वेन वह्न्यभावविषयकत्वस्य प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात् तत्त्वस्य संबंधरूपावच्छेदक तावच्छेदकत्वमनतिरिक्तवृत्तित्वावच्छेदकत्वमित्यर्थः वह्न्यभावविषयकत्वस्यावच्छेदककोटिप्रविष्टत्वेऽप्यवच्छेदकताया पीप्ततिधिकरणत्वादनतिरिक्तवृत्तित्वाभावान्नातिव्याप्तिरिति भावः पर्याप्तिनिवेशः संभवाद्यर्थे अत्र भासमानेत्यस्य ... दि तत्र साधि कस्य प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्व निवेशे हेतौ वह्निमान् ह्रदादित्यादौ वह्न्यभावविशि ष्टह्रदादावव्याप्तिः प्रतिबंधकताभाववत्त्वात् ह्रदस्येत्याशंकायां तेनेव वह्न्यभावविशिष्टह्रदविषयकत्वस्य सत्त्वात् विशिष्टह्रदस्य ह्रदानति रेकादित्यत आह यद्विषयकत्वेनेति एतद्विषयकलक्षणप्रयोजनमाह तेनेति बाधभ्रमस्य बाधभ्रमसाधारणस्य पर्वतविशेष्यकवह्न्यभा

हेतुप्रसंगाद्धेत्वाभासान्विभजते अनेकांतइति तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम् तथाहि व्य भिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्तेदोषाः अनैकांतिको विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः कालात्ययापदि ष्टश्च हेत्वाभासाश्च पंचधा आद्यः साधारणस्तु स्यादसाधारणकोऽपरः तथैवानुपसंहारी त्रिधाऽनैकांतिको भवेत् यद्विषयक त्वेन यादृशविशिष्टविषयकत्वेनेत्यर्थः तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि ... तत्र पर्वतो वह्न्यभाववानिति विशिष्टस्याप्र
सिद्धत्वात् ...

वप्रकारकत्वादेरित्यर्थः अनुमितिविरोधित्वेऽपि अनुमितिविरोधितावच्छेदकत्वेऽपि न क्षतिः नव्यह्न्यभावादावतिव्याप्तिः इत्यत आह वह्न्यभा वविषयकत्वस्य पर्वतविशेष्यकवह्न्यभावप्रकारकत्वरूपानुमितिप्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्तत्रातिव्याप्तिः स्यादिति भावः या दृशविशिष्टेति विवक्षितेतु तत्रातिव्याप्तिर्नेत्याह तत्रेत्यादिना वह्न्यभावविशिष्टपर्वतस्याप्रसिद्धत्वेऽपि यादृशविशिष्टपदेन वह्न्यभाव त्वविशिष्टवह्न्यभावमुपादाय तत्रातिव्याप्तिरिति वाच्यं यादृशविशिष्टेति विवक्षितो यत्किंचित्त्विति तस्यैवावच्छेदकत्वस्य लक्षणे निवेश नीयत्वात् वह्न्यभावविषयकत्वस्य प्रतिबंधकताभाववत्तिवह्न्यभावस्तित्वाने तत्रातिव्याप्तेरभावात् नचैवं ... रीत्या वह्न्यभा वविशिष्टह्रदादावव्याप्तिरिति वाच्यं यादृशविशिष्टविषयकत्वेनेत्यस्य यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थकत्वात्तन्मिलित ... र्थकत्वात् ह्रदत्वेनेव वह्न्यभावत्वावच्छिन्नविषयकत्वाभावात् यत्पदार्थानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य विवक्षणेऽनुमितिप्र तिबंधकताभाववत्ति ... ह्रदत्व ... [illegible] ... निश्चयत्वेन वह्न्यभावविशि ष्टह्रदविषयकत्वस्य संभवः ... नाहार्याप्रामाण्यज्ञान ... निश्चयपरतया ... निश्चयत्वेन
वह्न्यभाववत्त्वावच्छिन्नप्रकारकत्वविशिष्टह्रदत्वावच्छिन्न ...

[illegible] Lal Bahadur Shastri University, Delhi. Digitized by [illegible]

कपर

अनुमितिसामग्रीरूपपरामर्शात्मकशाब्दसिद्धौ सत्यामित्यर्थः

सिद्धिरेवेत्येवकारेण सामानाधिकरण्येन सिद्धिव्यवच्छेदः सामानाधिकरण्येनानुमितिं प्रति सिद्धिर्न सामानाधिकरण्यमात्रेणानुमितिं प्रतिबन्धिकेत्यर्थः
पक्षतावच्छेदकावच्छेदेनानुमितेरपि सामानाधिकरण्यावगाहित्वेन तद्व्यवच्छेदाप्रतीतेः सिद्धिर्नानुमिति [illegible] विशेष्यकसाध्यप्रकारकनिश्चय
त्वेनाविरोधित्वमित्यर्थः [illegible] सिसाधयिषाविरहविशिष्टस्य सिद्धिप्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षतातेन सिद्धिकाले समानविषय[illegible]
कप्रत्यक्षसामग्रीकालेऽपि चानुमित्यापत्तिरित्याह नन्वित्यादिना प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्षौ प्रवेशे प्रत्यक्षसामग्रीकाले कथं नानुमिति
रित्युक्तरीत्या जिज्ञासानुमानादेर्वैयर्थ्यं प्रथमतः [illegible] इदं च वा [illegible] मित्यादिना संशयोत्तरप्रत्यक्षहेतुभूतस्य विशेषदर्शनस्य सत्त्वादिति
भावः एतादृशप्रत्यक्षसामग्रीविशेषवर्जनानुधावने च तद्विषयेऽनुमितिसामग्र्याः सम्भवनिरूपणार्थं स्वातन्त्र्येणानुमितिसामग्रीप्रदर्शने प्रया
सापत्तेः स्वातन्त्र्येणेति ननु पक्षताकुक्षिप्रविष्टत्वेनेत्यर्थः [illegible] तामनुमितिं [illegible] सिद्धावनुमितिः
गोचरत्वेन तादृशप्रत्यक्षसामग्रीकालेऽनुमित्यनुत्पादेन सामग्र्यामनुमितिविषयकत्व [illegible] पक्षतायां कल्

पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्र
ति तु सिद्धिमात्रं विरोधि इदं तु बोध्यम् [illegible] तरं पुरुषत्वव्यापकरादिमानिति ज्ञाने तथाऽऽसत्यामनुमित्सायां पुरु
षत्वस्य प्रत्यक्षं भवति न त्वनुमितिः अतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कालिनी जिज्ञासादिवत् स्वातन्त्र्येण
प्रतिबन्धिका एवं परामर्शानन्तरं विना [illegible] दादिप्रत्यक्षानुत्पत्तेः अनुमित्साविरहविशिष्टानुमितिसामग्रीभिन्नविषयकप्रत्यक्षे

दशौ२

ऽपि तेजकतासम्भवात् एवमनुमित्साविरहस्यानेकसम्बन्धेन विशेषणत्वे सिद्धौ समवायघटितसामानाधिकरण्येन चक्षुः
संयोगादिसामग्र्यां तु स्वाश्रयचक्षुःसंयुक्तमनःप्रतियोगिकविजातीयसंयोगघटितसामानाधिकरण्येन कल्पनीयेन तयोः प्रतिबन्धकत्वसं
भवादित्याशयः इति दिक् ननु अनुमितिं प्रति प्रत्यक्षसामग्र्याः स्वातन्त्र्येण प्रतिबन्धकत्वे भिन्नविषयप्रत्यक्षसामग्रीकालेऽनुमित्यनुत्प
त्तिः स्यात् तु अनुमानादिनिरूपकत्वेन साधकमानत्वेन पक्षताकुक्षौ तस्याः प्रवेशो नोक्त इत्यत आह एवमि
ति अनुमितिसामग्री प्रतिबन्धिकेति तथा च भिन्नविषयकानुमितिसामग्र्यभावघटितप्रत्यक्षसामग्र्यास्तदाभावान्न पूर्वोक्तस्थ
लेऽनुमित्यनुपपत्तिरिति भावः यद्वा अनुमितिसामग्री प्रतिबन्धिका अनुमितिसामग्र्येव प्रतिबन्धिकाननु भिन्नविषयेऽप्रत्यक्ष
सामग्र्यनुमितौ प्रतिबन्धिके [illegible] प्रतिबन्धिकत्वात् न पूर्वोक्तानुप
पत्तिरिति भावः॥ ५ ५ ५ ५ ५ ॥ ५ ५ ५ ५ ५ ५ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

२

समृचापिनेति-२

तद्वत्वंचेति नचवह्नि अभिचारादविशिष्टद्रव्यत्वादेर्धर्मेपि सत्वादतिव्याप्तिरितिवाच्यम् यादृशविशिष्टविषयकज्ञानत्वेनयद्धेतु
कानुमितिप्रतिबंधकत्वं तादृशविशिष्टाश्रयतद्धेतुत्वस्यैवदुष्टत्वादिति सत्प्रतिपक्षोदेरनित्यदोषत्ववादिनांमतमाह यद्वेतीति ननुव
ह्न्यभावादिव्याप्तेर्यत्पदेनोपादानेपि तस्याधूमादौ तत्र धूमस्यदुष्टत्वंनस्यादतआह तद्वत्वंचेति ज्ञानेति एकस्मात्
विषयत्वेनतद्वत्वमित्यर्थः तद्वत्वस्यसाध्याभाववत्वस्य तत्रबाधकालीनधूमादिसद्धेतावित्यर्थः अत्रप्रतियतामशेकालीनेधू

का० मु०टी० ६६

तद्वत्वंचहेतोयेनकेनापिसंबंधेनेतिनव्याः परेतुयद्विषयकत्वेनज्ञानस्यानुमितिविरोधित्वंतद्वत्वंहेत्वाभासत्वेसत्प्र
तिपक्षेविरोधिव्याप्त्यादिकमेवतथा तद्वत्वंचहेतोर्ज्ञानिरूपसंबंधेनतेनचैवंवह्निमान्धूमादित्यादौपक्षेबाधभ्रम
स्यसाध्याभावविषयकत्वेनानुमितिविरोधित्वात् ज्ञानरूपसंबंधेनतद्वत्वस्यापिसत्वात्सद्धेतावपिबाधितत्वापत्तिरिति
रितिवाच्यम् तत्रज्ञानस्यसंबंधत्वाकल्पनात् अत्रसत्प्रतिपक्षितइति व्यवहारेणतत्कल्पनात् तत्रबाधितइतिव्य
वहाराभावादित्याहुः अनुमितिविरोधित्वंच अनुमिततत्करणान्यतरविरोधित्वं तेन अभिचारिणिनाव्याप्तिः दो ०
षज्ञानंचयद्धेतुविषयकंतद्धेतुकानुमितौप्रतिबंधकंतेनैकहेतौअभिचारज्ञानेहेत्वंतरेणानुमित्युत्पत्तेः॥ रामराम॥

30

माद्धिसद्धेतौ तत्कल्पनात् ज्ञानस्यसंबंधत्वकल्पनात् ननुसद्धेतावपिबाधितइतिव्यवहारेणसंबंधत्वकल्प्यं ज्ञानस्य
भविष्यतीत्यतआह तत्रेतिवा धभ्रमकालीनेसद्धेतावित्यर्थः धूमवत्पर्वतंबाधितइत्येवंप्रत्यक्षत्वंनइत्येवंव्यवहारादितिभा
वः तादृशव्यवहाराव्यवहार्ये स्वानुभवमात्रसाक्षिकत्वमाहुरित्यस्वरसवीजम् यथाप्रतिविरोधित्वमागेबीजमाहतेनेत्या
दिना॥ राम ६६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उपलक्षणमितिहेत्वाभावपक्ष ... भावबोधितत्वे ...
जिःपक्षतावच्छेदकाभावविशिष्टपक्ष ... त्वावच्छेदकाभावहेत्वादिबोधक
हेत्वाभावव्याप्यहेतुनिष्ठसाध्याभावसामानाधिकरण्यपक्षनिष्ठपक्षतावच्छेदकाभावहेत्वादिबोधकन

सत्प्रतिपक्षस्यानित्यदोषत्ववादीशंकते नचेति विशिष्टस्याप्रसिद्धत्वादिति वाधाएाम [illegible] निवह्न्यभावव्याप्यत्वाभावादितिभावः इ
त्यापत्तेरिति तथाचसद्धेतूनांप्रतिपरामर्शसत्वेपिनदुष्टत्वमितिभावः अन्यथाप्रतिबंधीभूतभ्रमविषयस्यापिदोषत्वे ऽनित्य
दोषत्वापत्तेरिति पक्षेसाध्याभावभ्रमदशायांसद्धेतावपिदोषत्वापत्तेरित्यर्थः इत्थंचयादृशविशिष्टविषयकत्वेनज्ञानस्यप्रति
बंधकत्वंतादृशविशिष्टस्यदोषत्वेच हेत्वादिकमित्यादिनासाध्याभावविशिष्टपक्षादिर्ग्रहः यादृशविशिष्टपदेद्ध्यभिप्रा

नचवह्न्यभावव्याप्यपाषाणमयत्ववानितिपरामर्शकालेवह्नि
व्याप्यधूमस्याभासत्वेनस्यात् नचवह्न्यभावव्याप्यवान्पक्ष इति
विशिष्टस्याप्रसिद्धत्वादितिवाच्यम् इत्यापत्तेःअन्यथावाधस्या
प्यनित्यदोषत्वापत्तेः तस्मान्नचवह्न्यभावव्याप्यपाषाणमयत्व
वानितिपरामर्शकालेवह्निव्याप्यधूमस्यनाभासत्वंकिंतुभ्रमा
दनुमितिप्रतिबंधमात्रंहेतुस्तुनदुष्टःइति इत्थंचसाध्याभाव
वद्वृत्तिहेत्वादिकंदोषः॥ १ ॥श्री॥ १ ॥श्रीरामायनमःराम॥

साध्याभाववद्वृत्तिरितानि-२

यत्वादिकमादायलक्षणंनसंभवतिव्यभिचारविषयकत्वस्यप्रतिबंधकताघटकत्वेव्यभिचार इति ज्ञाने वानित्वेनानतिरिक्तव
त्त्वाभावात् किंतुव्यभिचारादिविशिष्टहेत्वादिकमादायैवेति व्यभिचारादिविशिष्टहेत्वादिकमेवदोषइतिभावः ननुव्य
भिचारादिविशिष्टस्यहेतोर्दोषत्वेतद्वत्त्वस्यहेत्वाभासत्वाद्धेतोर्दुष्टत्वव्यवहारोनस्यात् नचवादिस्येनतद्वत्वंविवक्षितंपक्ष
तिवाच्यं तथासतिवह्न्यभावविशिष्टह्रदादेःस्वरूपसंबन्धेनाविनहृदपक्षकेधूमहेतौ [illegible] नस्यादित्यत आह॥ रामस्य
तादात्म्येनतद्वत्वंविवक्षितं १०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पृथ्वीजलादिभिन्नादन्यादितिव्यापत्ते पृथ्वीजलभिन्ना-
नित्यत्वव्याप्यवदितरस्य पीतपृथ्वीजलभिन्नागंधवत्वादिति
व्यतिरेकी

प्राचीनमतमाह अन्येत्विति यत्र साध्यसंदेहदशायामेवासाधारण्यं हेत्वाभासत्वानानुमितिप्रतिबन्धदशायां तदा पक्षस्यैव सपक्षत्वेन नि-
श्चितसाध्यवत्त्वाभावत्वाभावात् असिद्धदोषत्वं तस्येत्याह इत्थं चेति असाधारण्यघटकसपक्षत्वस्य निश्चयघटितत्वे चेत्यर्थः
न निश्चितसाध्यवत्तियदा साधारण्यादिव्याप्यमेकहेत्वाभासत्वानुपपत्तिरिति दर्शिता अनेनास्वरसः सूचितः अतिरेकि आदिग्रहप्रति-
बन्धक इति केवलान्वयिसाध्यके चान्वयव्याप्तिज्ञानादेवानुमितिरिति भावः ननु एवं साध्याभावसाधकान्तरस्य सत्प्रतिपक्षत्वादिविरुद्धस्य
का० मु० टी० ६७ भेदो न स्यादत आह सत्प्रतिपक्षेत्विति प्रतिहेतुः प्रतिकूलोक्तिर्योहि तुरिति शेषः इत्थं चैनयोर्भेदः ननु दूषकतावीजभेदेऽपि तु भेदः
सत्प्रतिपक्षोहि बैको विरुद्धरूपं हेत्वाभासान्तरमुच्यते तदा पक्षान्वयिनाहिन्तरेण प्रतिरोधः ततः सत्प्रतिपक्षो यत्र नु व्यतिरेकि ज्ञानत्वे
भासान्तरं स्यादतो भेदकान्तरमप्याह साध्याभावेति वस्तुतः साध्याभावसाधके हेतावेव तत्त्वसाध्यसाधकत्वभ्रम इति स्यात्

सर्वमार्गस्मिषिधे पसमेपत्वात्= अन्येतु सपक्षाद्व्यतिरसाधारणः सपक्षः निश्चितसाध्यवान् दृष्टं च यदा पक्षे साध्यनिश्चयस्तदा नासाधारण्यं तत्र हेतौ
यादिति वदन्ति अनुपसंहारी चान्वयव्याप्तिविरोधिसाध्यकोटिः अनेन च व्यतिरेकि व्याप्तिग्रहः प्रतिबध्यते विरुद्ध
साध्यव्यापकीभूताभावप्रतियोगी अयं च साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः सत्प्रतिपक्षेत्विति प्रतिहेतुः साध्याभावसाध-
कः अत्र तेनु रेक एवेति विशेषः साध्याभाववत्त्वाप्तिवान् धर्मो वा साध्यसाधकत्वेनोपन्यस्त इति शक्तिविशेषान्नायकत्वाच्च
शब्दो नित्यः श्रावणत्वात् विशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वेनोपस्थितिकालीनतदभावव्या-
शब्दोऽनित्यः कृतकत्वात्= प्यवत्त्वेनागृहीताप्रामाण्यकोपस्थितिविषयः इदं च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबन्धः।
५=

39

नं प्रतिबन्धकतावश्यक्षिप्रस्वकत्वे विरुद्धस्य नन्वेवं सत्प्रतिपक्षस्येतिभावः साध्याभावव्याप्येति एवं साध्यवदन्यत्वव्याप्यवान्पक्षः
निष्ठो साध्याभावसाध्यवदन्यत्वव्याप्यत्वादिर्व्यो अन्यतमत्वादिनानुगमात् न विभागव्याघातः सत्प्रतिपक्षमाहरोधयेद
न्येषां सत्प्रतिपक्षत्वलक्षणमाह अगृहीतेति नित्यत्वव्याप्यश्रावणत्ववत्ताज्ञानस्य तत्कालीनानित्यत्वव्याप्यकृतकत्वपरामर्श-
त्वेपि सत्प्रतिपक्षत्वव्यवहाराभावात्कालीनान्तमुपस्थितिविशेषणं गृहीताप्रामाण्यकनित्यत्वव्याप्यवत्ताज्ञानकालीनानित्यत्व-
व्याप्यकृतकत्वपरामर्शस्यैवापि तत्र व्यवहाराभावादगृहीताप्रामाण्यकेति प्रथमोपस्थितिविशेषणं तादृशकालीनानित्यत्व-
वत्तापरामर्शस्यापि तत्राप्रामाण्यग्रहकाले तत्र व्यवहाराभावादगृहीताप्रामाण्यकेति द्वितीयोपस्थितिविशेषणं
त्रोपयोगिनोनिष्कृष्टरूपस्य श्रुतानुपयोगः उपस्थितिघटितस्योक्तरूपस्य स्वरूपसत् तावोपयुक्तसामान्यायामप्रयोजक
दत्तस्वरसंसूचयति CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham ॥

यत्साध्यावच्छिन्नविषयक... कत्वं प्रकृते तत्तद्वच्छेदकमपि
वह्न्यभावविशिष्टह्रदत्वस्य= पक्षविशिष्टसाध्याभावेन वह्निविशिष्टत्वावच्छिन्नविषयकत्वेन प्रतिबं-
धकतावच्छेदकमिति=३=

